लड़ लास अफिरन् लवार अड्डार वोतर तातो लाल अलिरन् लडे पुर लसुल लुन्ड
लव मौलि लाल लवना यह लता लास लोल लवन विलोक अलिलन् लिल लिला
लोक लिप । आदेश लल लता वर्तो अलिलन् लिला लीत लार्त लार्त लप

राय ईर्या अरयः पेयरः दिति अदिति उदन्त दन्त दन्ति दान्त दुत तदा तुन्द दरि आदरवि दूत दूति उदात्त दत्त उदेति उदित ददातु ददाति ददते दत्ते तुदति तुदतु हव हाय वाहु वाहवी वहु वहिः वाहा हाव विवाह आहव आहाव अवहत् उवाह हविः वह्नी वही उशनाः शनि निशा अशनिः ईशान शनैः नाश अनिश शुना शूनः नाश ननाश कत्रि कम्बु बक काको अम्बिका केवा मन्द अमोद मुदा मोद मिमेदे दम माडाः सायम् सेयम् सोयम् असूया आय अयसा यस्या अयास्यन् दोषा दोष जीव बीज वाजि जव अजीवत् अजीजवत् जिजीव आयाम यम याम मधु मय अमेय आमय माया कुदु कुद्द माघ मेघ मोघ मघा जिघि शरत् शौरि शूर राशि शर सहस् सहमा सेहा हास हंस सोहम् सिंह साहस सेहे असा गगन गान नाग नग अनङ्ग काश आकाश कौशिक कुशिक केश कुश अङ्कुश शङ्क शकम् शुक कोश अशोक शङ्का शूक अनन्त नृत्त नीति नत नति तेन ततान तेने आनीत तनु तनू नूतन नुन्न नेता नुति अभ्र भर भार भीरु भूरि भरो रम्भा आरम्भ बिम्ब वयम् वायु यव वायु युवन् अवयन् उवाय घन घनाघन कुकुल ककुभ कुम्भ भेक कुम्भी अपाचि चम्पा चम्प अपचन् अपीपचत् चाप चम्पू पर पार पुर पूर पौर अपर अपार अरोप पुरी उदीची उदञ्चत् जम्भ अमजन् अभञ्जि अभाजि भेजे भाज अम्भोज भोज भुज पवि वापी अवपत् अपीपवत् उवाप पीवा अतिभी भूत भीति भिति भीता भापा अभाषि भूषा भिषक् भीषा वचम् घाघा वधा वध्य अवोचन् ववाच वीचि चञ्चु चाच अगमत् गम आगम मागा. छन्दः आच्छाद उच्छेद अच्छिदत् धातुः धाता धौत आधौत अधीते अधीत अधस्त धत्ते धत्त. कंस सेक कसा अकसन् अकासि अङ्ग गत जगौ काम मूक मोक किमु कामिन् कामुकवाणी वीणा वणिक् वेणी वाण सनी सीता सुत हुत सित असित आसित मन्ति सन्तु सनत सन्तत सेतु सोता सात मेना मेनाक मनाक् मान मुनि मौन नेमी नमि नौमि नुम. आमन् मेने मीन मनम् मानिन् जय जाया ऊय जेय अजयन् जीयात् यज युयोज सेना सेनानी सूना आसन्न आसीन आसन माला गुहा गुह हिङ्गु गूह अगूह अगाहि चण्डी चण्ड उच्चण्ड चौड चल अञ्चल अचल चेल चोल चञ्चल चलाचल चाचलि चूला चुला चुली चञ्चा अलोच अचलन् अचालीत् चचाल भृङ्गी भृङ्ग भोग भग भाग भङ्ग भागी भोगी जड आल छाजा ) । एवमन्येऽपि ज्ञेया. ॥

स्याक्षर.कण्ठादि, तच्चित्रम् । यथा—

नेताऽनन्तनतोऽनम्न. सोऽधालासोदिम्नातले ।
धुनासिदासिनोताऽदरनुम्रनुनुतः सदा ॥

दन्त्यप्रधानः ।

प्रारब्धसर्वोन्नितमूर्तिचर्यो मर्यादयान्वितः ।
समुद्रवद्गुरुधीः सभ्यो जयति सन्नितः ॥ १ ॥

अकण्ठ्यः । एवमन्यत् । एते शब्दाः प्रत्याख्यानाय दर्शिताः ॥

गतिर्गमस्रवागनृणांमूत्रिकागुणनदत्ताद्गतमस्यागमाऽद्वगतमर्वतोमहाऽर्थममारोति

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ह | दू | य | पी | दि | पै | गि | दा |
| यै | वि | ह | दु | या | दि | ही | पे |
| दे | है | प | गू | पु | हृ | द | पी |
| पा | ये | दै | है | दी | पु | पू | हु |

तुरगपदबन्धः ।

हयपद इति चत्वारो वर्णाः, श्लोकेऽपि चत्वारः पादाः, ततो यथाक्रममेकैकपादे प्रत्येकैकवर्णो ज्ञेयः । स्वरैश्चाष्टमेकया ज्ञेया । अ आ इ ई उ ऊ ए ऐ, इत्यष्टस्वराः । श्लोकपादे चाऽष्टवर्णाः । यथा-ह हा हि ही हु हू हे है, य या यि यी यु यू ये यै, प पा पि पी पु पू पे पै, द दा दि दी दु दू दे दै, अयं श्लोकस्तुरगपदेन क्रमेण, हरदपीत्यादि ॥

का स्वा निजहारेण
लोहातानिलारका ।
वाहमाराणरार्थीन
न धीरा परमा रमा ॥

पादगतप्रत्यागतम् ।

कुरङ्गीलवराज्यामनादीनि ॥

अनुस्वारविसर्गान्तरं यथा—( दिवं दिवा दिवे [illegible]
[illegible]

पीत दम्भ अङ्गमर्दक ऊर्ध्वन्दम अतिजव जवन आराधना धन्योसि वक्र पदाति आर्य शाक पाद्य सम्मना प्रामेय कुलीन रामा ललना अङ्कण उपमानेन विलास धर्या वल्लभा दम्पती भोगिन्यौ स्वतन्त्रा मातुलानी श्यामा कात्यायनी वारवधू आर्तव संवेशन दोहद आसन्नसत्वा कलल दास सोदर अवरज कनीयान् मातुला ननान्दा ननान्दा नन्दिनी हाली परीहास देवन उपमानी वीरमाता श्वशुर पितर भ्राता बान्धव आयतन श्यालक कुणप कबन्ध अवयव राशिक लाप भ्रमरक अलका भ्रमर लक सवता सीमन्त केशपाश काकपक्ष वेष्टन भावनीय अवलोकन निशामन द्योतन अपाङ्ग विकार नासिका ओष्ठा रसना कन्धरा अनामिका कामाङ्कुश तिलक रोमलता आरोह जघन वराङ्ग जङ्गल पल्लव परिकर्म अङ्गराग संवर्तन कोलक नायिका तरल ललामक लज्जा कर्णपूर कर्णिकाहारी अङ्गद वलय रसना सारसन कार्पास कञ्चुक अलार्द्र ललित ललिमा पात्र कज्जल दीप पार्थिव त्रिशङ्कु ] ।

एकार्थैरनुलोमप्रतिलोमशब्दा यथा—[ कलङ्क पतद्ग्राह वासवा कौशिको विभी कालिकः तावना कारिका कोरको नयन अपलाप दर्शन मन्दन साध्वसा दर्भीय कञ्चुक कटक कण्टक नक्षत्र आह्वया मनुनः दैत्यदैः सरोम आकर्णिकभा यातुधा कोककोकी योरपयो रस्थार विभाति पातया मायेन आयाम कचसूचक नाम्नीनाम् हासीहा हायहा सूरिसू दशर धावत्रा लोहलो स्वेच्छास्त्रे तानेनेता गोप्यगो भीरभी पापा शय्याश वर कैतव दम्भम सम्भामा मार्दना कक्षकनत्रेन नक्षेत्र लगुड कोशको कामुका अर्हणार्ह वर्णात्र वेशाके करपात्र उपतापक कोपतापको आयुधाकण्टक सारस निधनि विधि स्यन्दन्य सङ्गम जनन जारयजा गोत्रगो योजयो जननज कान्ताकाम् हिमताहिम भाषभा हावहा हेलाहे गौरीगौ मध्यम तरणीतर जनीज नूनुनू याजाया वर्णीमणीव दम्पतीतर योषयोः सान्धीमा यानिया ईई रोदसी कमलक योनयोः मामेया अद्राभ हास्यहा रम्भोरः बान्धवा मात्रमा दरद मारमा हस्तह केशाङ्क मालेमा दंष्ट्राद दन्तदं दर्दर मर मदनमातुना रसिता पक्ता अङ्गुलकङ्गुलं अङ्गुरागं कपिङ्कं काञ्चिका कञ्चुक तरल: मनुज भूरिभू नूपननु कनक ] । एवमन्येऽपि ज्ञेयाः ॥

आकारः स्वाद्याकृतिभिश्चित्रम् । यथा—

> श्लेषार्थोपमकूटादिगूढाद्यादिकैः ।
> प्रतिलोमानुलोमस्थैः शब्दैश्चित्रसमुच्चयः ॥ १८५ ॥


श्लेषानुप्रासवक्रोक्तिप्रश्नोत्तरप्रहेलिकाप्रतिलोमादिभिः प्रभावास्वरगुणैः सङ्कीर्णानुप्रासवैश्च सर्वविधाश्चित्राणि संभवन्ति ।

> सर्वेष्वाकारचित्रेषु वर्णावृत्तिस्तु शब्दिषु ।
> कार्या ... पुनरुक्तौ च वर्णयोरपि ॥ १८६ ॥
> संयुक्ताः ... वर्णावर्णानिवाक्यया ।
> स्वरवर्णक्रमनवर्दिवमणमात्रमात्रयोः ॥ १८७ ॥

डलयोश्च विरोधो न यमकश्लेषचित्रयोः ।

यथेदम् ॥

[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥




क पाद मन्मथ पार्थिव कुलीन रामा ललना मङ्गल उपमानेन विलास चर्या कलभा स्त्री योगिन्यौ स्वतन्त्रा मातुलानी श्यामा कात्यायनी वासवदू आर्यव संसत हृद आसन्नपन्था कल्प दाम सौद्र अजस्र कलीवान् मातुला ननान्दा ननन्दा ल्दिनो हाली परिहास देवन उपमायी धीरमाता श्वशुर पितृ भ्राता बान्धव आपन्न ामक कुसर कबन्ध मत्सर राशिक कार भ्रमरक मल्लिका भ्रमर लक मदना सीमन्त मराल काकरक देहन भावनीय भवनोदक निमानन योजन मयातृ विकार नासिका ीमा रमना कन्धरा अनामिका कामाङ्कुश तिलक रोमलता आरोह अञ्चन वराङ्ग कृत पवन परिकर्म अङ्गराग संवर्त्त कौतुक नायिका तरल लज्जासक कल्पा कर्णपूर र्णिकारहारी मङ्गल बन्ध रसना मागधन कार्मण हवन अभ्यङ्ग कलिम तर्जिमा वाचक उज्ज्वल हरिण पार्थिव त्रिशङ्कु ] ।

गन्धर्वादेऽनुलोमप्रतिलोमसज्ञका यथा—[ कमठु परशुराम वामदा कौशिकी त्रिपदि पञ्चिकः तारका कालिका कोरको मदन मरणाय वर्तन मन्दर मालवमा वाचीव कनुकक रक कनक मन्दार आश्रमा मनुज. दैवतैः प्रेम मार्कण्डमा वागुरा कोमको ास्वकौ त्सार विमादि वानरा मावेन मायामा कनमूलक मारीनाम् दामोदर दाशरथ ामि् रुधर वाचना कोरको स्वैरपाद तानैनेमा गोत्रमो भीरमा चारा शम्पाश बन. स्व हरवद् मारवामा मादेना कणवमेन मनौन अगुरु कौशको कामुका मईमाईम कर देवकि बाबावर ग्रामाप कोरनाको मातुमानदक मास निवनि विपवि चरमव सदाम प्रबल मान्धवा गोमती धीरवरो श्रमन सामवादान् [-मिनाविम मारथा स्वदा तद्योदन जनीय मृगुम् वामावा कनीयनीय हमनीतर ईई दोहरो कम्पक मानवो नामिपा प्रवाम दाम्पदा मारमा हल्लह कलाई माधमा देहार हन्त दर्शर मर मङ्गल मङ्गलानम कनिष्ठ वालिका कङ्कण नगर, ] ग्रता ।

हलयोश्च विरोधो न यमकश्लेषचित्रयोः ।

खड्गबन्धः ॥

[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥



साङ्काश्रितशृङ्गारा सारगानवयेक्षणा ।
आलोकितापि लोकस्य मनो हरति कामिनी ॥

अत्र साङ्कुसाङ्गेति । शब्दा यथा—[ स्यन्द मन्द मन्थ मङ्ग सङ्गङ्ग सम्मद सज कबन्ध चन्दन मन्दन सम्भ्रम संवर सङ्कर कम्बल जम्बीर चिन भ्रञ्जल करञ्जादयः ]। सानुस्वारवर्णेषु निरनुस्वारीकृतेष्वपि येषां शब्दानामर्थो मिलति तैर्बिन्दुच्युतं । यथा—

साहसेनाश्रिता पश्चाल्पेन जलदात्यये ।
अर्णवस्याभिसरणे रहो मुञ्चति वाहिनी ॥

अत्र हंसरंह-इत्यत्र बिन्दुः । शब्दा यथा—[ वंश हंस दंश रंहः ] प्रभृतयः । मांसा पिनाकि कुमार केशव कन्दर्प कलापि कार्हि काकोल जवन जघन चरण । गौरव केसर गुम्फक नक्षत्र नगर खञ्जन नगरञ्जन ] प्रभृतयः । अपरा—

मतनाकिमौलिमणिमण्डलीविभाभरभासुराङ्घ्रिसरसीरुहा सताम् ।
शिवशर्मणे भवतु भारती नृणां हठजाड्यखण्डनदिनेशभाततिः ॥

अत्र नन्दिमोचछन्दसि प्रतिपादमाद्याक्षरद्वयत्यागे रथोद्धतावृत्तेन, तथान्त्याक्षरद्वय- भद्रिकावृत्तेन भारतीस्तुतिः । अयं वर्णच्युतप्रकारः छन्दोमर्माणि ज्ञात्वा ...: साध्यः ॥

अथ चतुर्विधं गूढम् । क्रियागूढे भङ्गश्लेषाद्युपायैरेकाक्षरादिकाः क्रियाः प्रयोज्याः । यथा—

यथा यथा सन्तकुरङ्गनेत्रा प्रिया पुरो मेऽद्य तिरोहिताभो. ।
महोदधेः स्फारतरङ्गभङ्ग्या तथा तथा प्रेममयं मुदाऽहम् ॥

अत्र मेऽयति, दधे च क्रिये । क्रिया यथा—[ अस्ति स्तः अस्मि स्वः स्मः ] । ...: । एवं भवति, वशति, प्रभृतिभ्यो शेद्रितः । [ बिभेति बिभीतः बिभीमः ... बिभृतः मिमते मिमे जिहाते स्यति स्य दूयते मोयते लोयते ] इत्यादि । ... आरः आरा आगु ईयुः ] प्रभृतयः ॥

कर्तृकर्मादिगुप्तादि भङ्गश्लेषेण साधयेत् ॥ १८८ ॥

यथा—

मा न कोशभूते पुंसि शाश्वतीं स्थितिमाश्रयेत ।
राष्ट्रेभ्यो माप्नुयात्कोऽपि हेतः प्राप्नोति कन्नेः ॥

...इदं कर्मगुप्तम् । मा, न कर्माणं । वसादि कर्मगुप्तम् । लेभ्य इन्द्रियेभ्यः, ...म् । कन्नैः, कं सत्यम् ।

...गूढमपि भङ्गश्लेषेण साध्यम्—

काकला पृथिवीशाय स्वर्भीश्वरा तथाननम् ।
तदाप्रभृति तो निष्ये स्मरः स्वयाऽभयेनाम् ॥

हे कामिनि [illegible] ।
[illegible] । यथा—
[illegible] ।
[illegible] दृष्टे—
[illegible] ॥ इति ।
[illegible]—

प्रायोऽनुक्तं तु न बध्नीयात् पूर्णोक्ता विचक्षणैः ।
[illegible] ॥ १८६ ॥

इति श्रीजिनदत्तसूरिशिष्य[illegible]विरचितायां काव्यकल्पलतावृत्ति[illegible]-
वृत्तौ श्लेषसिद्धिप्रताने [illegible] स्तबकः समाप्तः ॥
समाप्तश्च श्लेषसिद्धिप्रतानश्चतुर्थः ॥

---

## अथार्थसिद्धिप्रतानः ।

तत्र प्रागलङ्काराः—

उपमायामलङ्कारास्सर्वेऽप्यर्थसिद्धये ।
पूर्णा साधर्म्यमुपमा सोपमानोपमेययोः ॥ १ ॥
धर्मोपमावाचकयोर्योगे पूर्णा मता यथा ।
शशीवाऽऽस्यं शुभं स्वच्छे, लुप्तैकद्वित्रिलोपतः ॥ २ ॥
उपमानस्य लोपे तु स्वयं सुखमिवासि नः, ।
धर्मलोपे शशीवास्यं, लोपे धर्मोपमानयोः ॥ ३ ॥
कुसुमं मालतीतुल्यं न भृङ्गो लभते भ्रमन् ।
धर्मवाद्युपमानानां लोपे हरिणलोचना ॥ ४ ॥
एकस्मिन्नुपमेये तु बहूपमानयोगतः ।
अभिन्ने वाऽथ भिन्ने वा धर्मे मालोपमा भवेत् ॥ ५ ॥
अमरेणेव भूपति,र्धौरेयेणेव कुलाङ्गना, ।
कार्पण्येनेव कमला, कला गर्वेण दुष्यते ॥ ६ ॥
पीयूषमिव सुस्वादु,मौक्तिकमिव विशोधकृत्, ।
क्षीराब्धिव तत्त्वनिष्णातः, सतां वचनविस्तरः ॥ ७ ॥
यत्र यान्त्युपमानत्वमुपमेयं यथोत्तरम् ।
सा भिन्नेनाऽप्यभिन्नेन धर्मेण रसनोपमा ॥ ८ ॥
साधोर्वितता विद्या, विद्यापदोपकृत् क्रिया, ।
क्रियावन्द्योऽतिशयाणी, वाणीवार्त्तिरुज्ज्वला ॥ ९ ॥
यस्यासीद्विमलं [illegible] विनयमम्मनः ।
मनोवदान्यं, दानवचसो, [illegible] ॥ १० ॥

परिकल्प्योपमेयं तु स्वेच्छया सविशेषणम् ।
सदृशस्योपमानस्य कल्पने कल्पितोपमा ॥ ११ ॥
उपकण्ठस्थवक्षोजयुग्ममस्या मुखं बभौ ।
सहस्रपत्रं पार्श्वस्थरथाङ्गमिथुनं यथा ॥ १२ ॥
उपमानोपमेयत्वं पर्यायेण द्वयोर्भवेत् ।
उपमेयोपमा मुखवदिन्दुरिन्दुवन्मुखम् ॥ १३ ॥

अथाऽभ्यासार्थमुपमावाचका उपमानानि धर्माः प्रपञ्च्यन्ते—

यथेववेत्यव्ययानि तुल्यमिश्रादिवाचिनः ।
प्रतिबिम्बादयश्च शब्दा वतिकल्पमुखास्तथा ॥ १४ ॥
तद्धिता ध्वाङ्क्षरावीन्दुमुखीत्यादयश्च वृत्तयः ।
स्पर्धते जयति द्वेष्टयनुकरोत्यादिकाः क्रियाः ॥ १५ ॥
क्यच्कर्माधिकरणयोराचिः कर्तृसमुद्भवः ।
कर्मकर्त्रोर्णमित्याद्या उपमावाचकाः स्मृताः ॥ १६ ॥
राजादीनां शिवब्रह्मविष्णुशेषसुरेश्वरान् ।
सूर्येन्दुजलदोदन्वदग्निसिंहाद्रिहस्तिनः ॥ १७ ॥
भूभूरुहनभोऽम्भोजमरालगरुडानिलान् ।
पुरारामसरोमुख्यानुपमानानि कल्पयेत् ॥
भजन्ति भावाः सर्वेऽपि भावानामुपमानताम् ॥ १८ ॥

पद्धती ।

वेण्याः सर्पासिभृङ्गाल्यः, केशपाशस्य चामरः ।
नीलकण्ठकलापोऽपि, धम्मिल्लस्य विधुन्तुदः, ॥ १९ ॥
सीमन्तस्याऽप्यदण्डौ च, ललाटस्याऽष्टमीविधुः, ।
फलकं च, कपोलस्य चन्द्रमा मुकुरस्थलम् ॥ २० ॥
भ्रुवोः स्मरधनुर्यष्टिरेखापल्लवपन्नगाः, ।
दृशोश्चकोरहरिणमदिराः खञ्जनोऽम्बुजम् ॥ २१ ॥
नीलोत्पलं च कुमुदं, श्रुतेर्दोला च पाशकः, ।
नासाया वंशोऽधोमुखतूणीरशुकचञ्चवः ॥ २२ ॥
तिलप्रसूनदण्डौ वा, ऽधरस्य नवपल्लवः ।
बिम्बीफलं प्रवालं च, दन्तानां मौक्तिकावलिः ॥ २३ ॥
कुन्ददाडिमबीजानि हीरकाश्च, स्मितस्य तु ।
ज्योत्स्ना दुग्धं च पीयूषं, श्वासस्याऽम्भोजसौरभम् , ॥ २४ ॥
जिह्वायास्त्वम्भसो दोला, वाण्या भृङ्गीपिकीरवौ ।
सुधा मधु च, वक्त्रस्य शशी पङ्कजदर्पणौ, ॥ २५ ॥
कण्ठस्य कम्बुरंसस्य कुम्भौ, बाह्वोश्च वल्लरी ।
मृणालकदलीशाखापाशाः, पाणिपद्मस्य तु ॥ २६ ॥

पद्मश्रीप्रभुमः, प्रत्यपादपद्मयो, मनस्पदेः ।
स्तनमण्डलप्रमाणानि, स्तनयोः स्तनदौ यदौ ॥ ४३ ॥
कुम्भिकुम्भौ गिरी चक्रौ स्तनस्थौ, मध्यस्य वेदिका ।
नितम्बनी च, दोलास्या वैतालपूर्णचन्द्रमा, ॥ २८ ॥
नाभिरावर्तमावर्तौ ह्रदौ विवरभूतयौ, ।
नितम्बा पुलिनस्योपानमिश्रैर्देशा, जघनस्य तु ॥ २९ ॥
पुलिनं चोरुकाण्डे, नितम्बस्य स्तम्भं पुनः, ।
ऊर्वोः कदलिकास्तम्भौ करभौ वरवर्णना, ॥ ३० ॥
जङ्घायुगस्य च तूणीरौ, गतेर्हंसगजङ्गमौ, ।
स्वाभाविकान्यपि स्तोत्र उपमानं यथोचितम् ॥ ३१ ॥
पुंसोऽङ्गे तूपमानानां विशेषः कोऽपि कथ्यते ।
वक्षसस्तु कपाटतालफलकौ, बाहोः परिघोरगौ ॥
इति सहस्रपदिकागोर्गलादण्डास्य, पदसः ॥ ३२ ॥
सर्वैरेतानि धर्मैर्लोपमानं बहुधा भवेत् ।
धर्मा धर्मविधायकस्तथाव्ययेनाधुना समाः ॥ ३३ ॥

कर्तव्य उपमानोपमेययोर्विपर्यासेऽपि चेति अस्ति व्यत्यासोपमानमेवेत्यपि भवति ।
एव एवार्थे व्यत्यासोपमानं यथा—

> मरालं इव स्त्रीरत्नं, मरालीं च मानुषम्, ।
> तद्रूपा सविभ्रमार्थं, हंसं भाषेव सोऽनुगन्, ॥
> आदित्यवत्प्रतापवान् स, शशिवत् स दिनेश्वरः, ।
> भद्रमूर्ता यथा सूर्यः, स्वेदवत् स सूर्यवत्, ॥

व्यत्यासः स्यादिहमतौ चोपमानोपमेययोः ।
उपमावाचकानां च धर्माणां च विपर्ययात् ॥ ३४ ॥

विपर्ययात्मकेन स्मरणे । विपरीतविपर्ययात्मकासो यथा—

> स विरहात् प्रविशेत तव स्तोत्रमिवार्थिना ।
> द्विषत्सु मालिकाप्युज्ज्वलं कलाम्भोऽद्रेरा रविः यथा ॥
> रविस्तेजोभ्यदाहरति तेन विनिहितं द्विषः ।
> कुर्वन्ति दुर्वातास्तत्रैव मृगा इव दिवाकरे ॥
> भवद्. प्रतापतस्मात् मृगा इव दिवाकरात् ।
> मनोवद्विविधवाक्सतामन्यार्थस्येव तेजसा ।
> स्वाभिविदितेन तम रावणो कृतान्तवक्त्रता। ॥

वरुणी ।

उपमानोपमेययोर्विपर्ययात्, उपमानं यद्भवति तदुपमेयं क्रियते—

> विजयी विधिवोऽर्थाभ्यामिव तमोऽभवत् ।
> अर्थात् रविमिव विजयी विधिवो यथा ॥

स्फुरिताळकवल्लीभिर्भाभाति भामिनीमुखम् ।
फुल्लोत्पलालिमालाभिर्नलिनी नलिनं यथा ॥
मधुरं पद्मिनीपत्रं प्रेङ्खत्षट्पदपङ्क्तिभिः ।
कान्तामुखमिवाभाति विलोलालकवल्लिभिः ॥

इत्यादि ।

[illegible] विपर्ययतया—

मुखं भाति यथाम्भोजं भात्यम्बुजमिवाननम् ।
अम्भोजं वा मुखं भाति मुखं पद्मनिभं बभौ ॥
स्मिताम्भोजमकरन्दवत्यं स्मितपद्मश्रियं मुखम् ।
मुखं पद्मवतिच्छन्दं मुखं स्मितसरोजवत् ॥
मुखं कमलकल्पं तत् पद्मप्रायं प्रियाननम् ।
पद्मदेशीयमाभं ते भाति पद्ममुखी प्रिया ॥
पद्मेन स्पर्धते वक्त्रं पद्मं जयति ते मुखम् ।
मुखमम्भोरुहं द्वेष्टि मुखं पद्मानुकारकम् ॥
विडम्बयति मुखं पद्मः पद्मोपमनिभे मुखे ।
पङ्केरुहश्रियं वक्त्रं पङ्केरुहति त्वन्मुखम् ॥
आननं तव पूर्णेन्दुरूपं पश्यामि कामिनि ।

पूर्णेन्दोरिव दर्शनं पूर्णं कर्षति योगमाने मम् । पूर्णेन्दुमिव [illegible] ।

मुखं पूर्णेन्दुवियोगे हरति यौवने तव ॥

पूर्णेन्दुनेव वियोगे पूर्णं कर्षति च मम्, यथा पूर्णेन्दुना यौवने तथा यौवन इत्यर्थं ।

[illegible] विपर्ययतया—

कलाभिः सकलाभिः स पूर्णेन्दुरिव भासते ।
स मुखं [illegible] कुमुदानामिवाकरोत् ॥
स [illegible] ।
[illegible] भुवि [illegible] ॥

[illegible] सर्वोपमा ॥ ३६ ॥

[illegible] यथा—

स [illegible] दिवाकरः ।
स [illegible] ॥
[illegible] ।
[illegible] ॥

[illegible]

[illegible] ।

[illegible] हि [illegible] ॥ ३६ ॥

क्वचित्—

[illegible] रूपकं वदनं विदुः ।
[illegible] ॥ ३७ ॥
मुखं [illegible] तु [illegible] ।
[illegible] पूर्णेन्दुदर्शनात् ॥ ३८ ॥
[illegible] विलोकने किं मुखं किं सुधाकरः ।
इदं भेदं [illegible] ॥ ३९ ॥
भेदं मुखं शशी [illegible] ।
[illegible] ॥ ४० ॥
[illegible] निर्जितं जगत् ।
[illegible] मुखं शशी [illegible] ॥ ४१ ॥
[illegible] भवेत् ।
[illegible] मुखं [illegible] ॥ ४२ ॥
[illegible] ।
[illegible] ॥ ४३ ॥

यथा—

[illegible] षट्पदैः ।
[illegible] ॥ ४४ ॥
[illegible] नूनमिव ध्रुवम् ।
[illegible] ॥ ४५ ॥

[illegible] एवं [illegible] दर्शिता ॥

इदं [illegible], यथा रूपकं चतुर्धा भवति—भेदम्, तोष्यम्, [illegible], [illegible] ।

यत्राद्यं भवेद् भेदं रूपकं तोष्यमन्यत् ।
[illegible] सिद्धं [illegible] ॥ ४६ ॥

[illegible] ॥

भेद रूपकं यथा—

ध्वान्तादि[illegible] ।
[illegible] रूपकं [illegible] ॥ ४७ ॥

यथा ध्वान्ते रविबिम्ब[illegible], [illegible], [illegible], समुद्रस्य[illegible], गिरीणां वज्रम्, [illegible], मेघस्य [illegible], अग्ने[illegible], [illegible], आदिशब्दात्[illegible]

मन्तकालदिनात्यया:, चन्द्रस्य राहुग्रासमरुत्प्रतिरत्नमालरविदिनलेखाः, प्रदोषस्य
रत्यामर्धदर्शनस्नेहदुदिशासपहुलहतिमरुदुग्रामसन्निभाः, नदीप्रवाहस्य सौम्यान्तरः,
दीपाधरस्य चण्डी, गजाधरत्रिपुरान्धककामदग्धाऽसुरादीनां शिवः, मधुकैटभवाणनरक-
कैटभकंसकेशिमुरराहुहिरण्यकशिपुकालियाहिनरकवलिशिशुपालसास्वमदनादीनां
विष्णुः, प्रलम्बासुरयमुनाप्रभृतीनां बलदेवः, मृगस्य सिंहव्याघ्रौ, मत्स्यमकरादीनां
धीवरः, वातारिवेताऽस्त्रिः, राज्ञेः प्रमाणम्, घूकतारेन्दुदीपौषधीचीरकुमुदचकोरचक्रवाक-
स्त्रादीनां रविः, कमलचकशाककमलां चन्द्रः, तूलस्य पवनः, धर्मस्य व्यजनं वायुः,
लघुकुसुमशरीरमयूरादीनां सर्पः, विन्ध्यस्याऽगस्त्यः, पद्मस्य हिमवर्षागजाः, हंसानां
प्रावृट्, भानरस्य भ्रमरः, अन्धकारस्य रविः, रवेः राहुः, राहोर्विष्णुः, पशुस्याग्निः, जलस्य
अनलः, वातस्य सर्पः, सर्पस्य गरुडः, गरुडस्य विष्णुः, वल्ल्या गजः, गजस्य सिंहः,
सिंहस्य शरभः, शरभस्य शलो हन्ता ॥

तोष्यं यथा—

> घनपद्मादिवचकोन्दुचक्रचातकषट्पदाः ।
> पिककेकिमुखाःस्तोष्या ऋतके मित्ररूपकैः ॥ ४८ ॥

वनानां मेघवसन्तागमकुसुमौषधीवनराजिकाः, पद्मस्यादित्यचन्द्रमसाः, समुद्र-
स्य चन्द्रपौर्णमी, हंसादीनां शरदागमः, चक्रवाकादीनां रविः, चातकानां मेघः, षट्-
पदानां पद्मं, कोकिलानां वसन्तः, मयूराणां मेघाः, मुख्यकरात् चकोरमनसे चन्द्रकान्ता-
नां चन्द्रः, कुमुदाकरौषधितमसां तमस्विनी, सूर्यकान्तदिनकमलिनीनां रविः ॥

आधारकार्यं यथा—

> इत्यगुणेर्भूतमोऽम्भोधिनदीयशगारुपः ।
> कल्पकयोः स्युराधारः—

वक्ता मादीनां भूराधारः, यथा-भूगदाभभूर्द्धः । ताराविचन्द्रादीनां नभ,
यथा-भूस्तारागणोदितः । कःस्मीत्मधारेर्विष्णुमस्तकलोकविष्णुमानमकरादीनां
समुद्रः, यथा-समुद्रमावनोदरे, भूतलमाकुचितैन इत्यादि । कमलहंसचक्रवाकादीनां
नद्यः, यथा-भूतलमोऽस्मरश्रुत्या, कमोदयमोदाम् इत्यादि । शुमनोवनमिथादीनां
[illegible] . यथा-भूतकुसुमनवं नां , मलयानिलमनसित्यादि । इत्यमतकरीशिवमादीनां
गिरि , यथा भूतसिकवतन , कांनिशगिरिमामवः । आदित्य[illegible]
[illegible] हिमाद्रि , नदीनां वर्षपरिधा विन्ध्यः, चन्द्रवदिक्कलादिकानां
[illegible] , मुनीनां कल्पनां , [illegible] मधयादिः, देवकन्नगुप्तमादादितादिभाकादि-
[illegible] मैनाकः, [illegible]
[illegible] देवाय आपदः , [illegible] यवम् , [illegible] मह-
[illegible] शुभ , देवकन्नगुप्तमन्यादितादिभाक-
[illegible]
[illegible] दैत्यम् , देवानां [illegible] स्वर्ग,
[illegible] भूतपुर, [illegible]

द्युतिमुख्यानां रविः, कलाचन्द्रिकाप्रभादीनां चन्द्रः । अमुना प्रकारेण स्वस्वगुणैः सर्वे पदार्था आधारा भवन्ति ॥

रामाद्याः केवलैः क्वचित् ॥ ४२ ॥

रामप्रमुखाः स्वगुणैः केवलैर्न्यायप्रमुखैराधाराः, रूपकं भवति । यथा-न्याये रामः । सन्धायां चाणक्यः । अहङ्कारे रावणः, दुर्योधनश्च । शौर्ये रामसिंहौ । साहसे विक्रमादित्यजीमूतवाहनौ । महसि मार्तण्डः । धीरत्वे रामः । शक्तौ कार्त्तिकेयः । धियां विष्णुः । विद्यायां भारतीबृहस्पतिशुक्राः । दाने कर्णशिबिबलिकल्पद्रुमकामधेनुचिन्तामणयः । शरणे शिबिवज्रायुधजीमूतवाहनाः । वाण्यां वाल्मीकिः । कामे रामः । कलासु चन्द्रः । माने युधिष्ठिरहरिश्चन्द्रौ । औचित्ये गुरुः । भक्तौ लक्ष्मणः । स्थैर्ये मेरुः । विवेके बृहस्पतिः । कीर्तौ रामः । विनये लक्ष्मणः । प्रज्ञायां गुरुः । प्रतिज्ञायामिन्द्रः । दयायां युधिष्ठिरः, जिनेन्द्रश्च । आज्ञायां लङ्केश्वरः । लावण्ये समुद्रः । सौहार्दे सुग्रीवः । गाम्भीर्ये समुद्रः । सौभाग्ये कामः । शोभायामिन्द्रः । क्षमे रामः । गतौ हंसगजवृषभाः । स्वरे पिकवीणाहंसकेकिमधुकराः । रूपे कामनलकूबरादिवनेयकुमारपुरूरवोमकुन्दाः । क्षमे मुनिः । प्रज्ञाने माकण्डेयस्कन्दशुकहनुमन्नारदाः । ज्योतिषे वराहमिहिरसहदेवौ । गणिते श्रीधरार्य । नाट्यनेरे भरताचार्यः । गीते तुम्बुरुकिन्नराप्सरसः । नृत्ये हरः । वाद्ये नन्दी । कवितायां वाल्मीकिव्यासकालिदासमाघाः । वैद्यके धन्वन्तरिः । विषनिषेधे पांशुलिः । दोषनिषेधे हनुमान् । लक्षणे पाणिनिः । तर्के दिङ्नागधर्मकीर्त्युद्योतनकराद्याः । छन्दसि पिङ्गलाचार्यः । अश्वहृदयज्ञाने, रसवत्यां च नलः । कामशास्त्रे वात्स्यायनः । नीतिशास्त्रे चाणक्यः । पुरुषस्त्रीलक्षणे समुद्रः । वेदे ब्रह्मा । रणवाद्ये व्याडिनागार्जुनौ । धाराग्रेषु अर्जुनः । धनुषि पिनाकी । वज्रे इन्द्रः । चक्रे विष्णुः । गदायां भीमः । पाशे वरुणः । दण्डे यमः । शक्तौ कार्त्तिकेयः । चन्द्रहासे रावणः । लाङ्गले बलभद्रः । परशौ परशुरामः । वास्तुशास्त्रे विश्वकर्मा । मल्लविद्यायां चाणूरमल्लः । क्षुरिकाविद्यायां वेतालभट्टः । मायायां विष्णुः । धूर्तत्वे मूलदेवः । परोपकारे जीमूतवाहनः ।

अथ दोषे—कुचङ्क्रमणे उष्ट्रखरशृगालाः । कुस्वरे उष्ट्रमार्जारखरटिट्टिभकाकघूकटिट्टिभाः । कापुरुषत्वे वेतालभट्टिरिटी । चौर्ये मार्जारः । दम्भे बकः । शीघ्रगमने मृगी । चापल्ये मर्कटः । क्रोधे सर्पः । भीरुत्वे शृगालः । तुच्छत्वे हस्तजङ्घम् । मानादिषु दुर्योधनादीनामुदाहरणम् ।

> माने दुर्योधनो, न्याये रामः, सत्ये युधिष्ठिरः, ।
> आज्ञायां लङ्केशः, शक्तौ कार्त्तिकेयो धराधवः ॥
> वाक्पाटवे सुराचार्यो, गम्भीरत्वे सरित्पतिः, ।
> मेरुर्धैर्ये, हरिः शौर्ये, प्रतापे तपनो नृपः ॥

अथवा एभिः सत्यादिभिर्गुणैः सत्यादिगुणवन्तश्चाणक्यादयो कीर्त्यन्ते । यथा—

प्रतापजितमार्तण्डो राजते पृथिवीपतिः ॥

आधेयं रूपकं यथा—

सिंहरत्नसरोऽम्भोजचन्द्रादित्यद्रुमादयः ।
स्याधारे रूपकप्रोक्तैः

वनपर्वतगुहादीनां सिंह आधेयम्, यथा-कुलकाननसिंहोऽयम्—इत्यादिकं ज्ञेयम्। समुद्रताम्रपर्णीरोहणाद्रिप्रभृतीनां रत्नमाधेयम्, यथा-कुलाम्भोनिधिमाणिक्यम्। मूपर्वताारण्यादीनां सर आधेयम्, यथा-भवारण्ये सुधासरः।

वंशपर्वतरीभूपसरोवरमयं नृपः।
भूरि स्फुरति संसारमरुभूरिसुधारसः ॥ इत्यादि ।

नदीसरःप्रभृतीनां जलस्थानानामम्भोजमाधेयम् नीतिस्रोतस्विनीपद्मम्, राजा राज्यसरोऽम्बुजम् इत्यादि। नभोब्धिशिरमालानां चन्द्र आधेयम्, यथा-कुलाकाशे निशानाथो, ज्ञानाब्धौ हिमदीधितिः। इत्यादि। आकाशस्य रविराधेयम्। महीपालकुलाकाशप्रकाशनदिनेश्वरः, इत्यादि। धराद्रिवनादीनां वृक्ष आधेयम्, यथा-संसारभूमिकल्पद्रुः, कुलाद्रौ देवपादपः, राज्यारामसालद्रुः-इत्यादि ॥

आधेयं केवलैः क्वचित् ॥ ५० ॥

मौलेः किरीटमाल्यमाणिक्यतिलकादय आधेयम्। अत्र केवलेन मौलिना रूपकरहितेन आधेयं कोटीरादि रूपकं भवति। यथा-भूपालमौलिकोटीरमाल्यमाणिक्यम्-इति, तथा कुलतिलक इति। वृक्षस्य लतायाश्च पत्रपुष्पफलशाखामूलकन्दपक्षिजातिप्रभृतय आधेयम्। पर्वतस्य नदीवृक्षरत्नमृगसिंहपुलिन्दगजकिन्नरादय आधेयम्। नद्याः पद्मभ्रमरहंसचक्रवाकमत्स्यादय आधेयम्। समुद्रस्य चन्द्रसुधावडवाग्निरत्नशङ्खश्रीमुक्तातरङ्गश्रीमत्स्यविद्रुमफेनविष्णुविषादय आधेयम्। चन्द्रस्य ज्योत्स्नाकलाकलङ्कादय आधेयम्। आदित्यस्य तापकिरणादि आधेयम्। आकाशस्य चन्द्रार्कतारागङ्गाप्रभृतय आधेयम्। पातालस्य गङ्गानागदैत्यहट्टकेश्वरतमःसुधाकुण्डादय आधेयम्। स्वर्गस्य देवेन्द्रविमानकल्पद्रुनन्दनवनगङ्गामन्दारपारिजातकहरिचन्दनसन्तानकादय आधेयम्। मेरोर्देवस्वर्गकामधेनुचिन्तामणिमन्दारप्रभृतय आधेयम्। कामिन्याः सीमन्तकुङ्कुमस्तबलकलीलाकमलादर्शकुण्डलकङ्कणकेयूरहारमञ्जीरस्मितकटाक्षधम्मिल्लवेणीकुचमुखकरचक्षुर्नासादय आधेयम्। वनस्य सारसीवापिकाहंसचक्रवाकमृगपर्वतभ्रमरगजसिंहसहकारादिवृक्षपुष्पमन्तवकपुलिन्दकतस्करमृगादय आधेयम्। गजस्य आदर्शसिन्दूरभूषणाङ्कुशवरत्रागुडिकोष्टक पताकायोधमुखपटकाङ्कुकुम्भस्थलदन्तकर्णपादादय आधेयम्। मण्डपस्य कुम्भलतास्तम्भचन्द्रोदयचन्दनमालामुक्तावचूलपुष्पप्रकरादय आधेयम्। विन्ध्यस्य गजनर्मदादय आधेयम्। हिमाचलस्य गङ्गाहिमकस्तूरिकामृगदेवदारुदिग्धौषधिचामरप्रभृतय आधेयम्। मलयाद्रेश्चन्दनदक्षिणानिलादय आधेयम्। रोहणस्य रत्नाद्याधेयम्। कैलासस्य शिवगौरीमानसधनदादय आधेयम्। गृहस्य स्तम्भकपाटद्वारादय आधेयम् ॥

अथाऽऽसोपादेयाः गुणाः—

सन्ध्याहंकृतिशौर्यसाहसमती धीरत्वशक्तिश्रियो
　　विद्यादानशरण्यताक्षमबलासत्यौचितीभक्तयः ।
न्यायस्थैर्यविवेककीर्तिविनयप्रज्ञाप्रतिज्ञादया—
　　लावण्यसुहृद्गम्भीरगुणतासौभाग्यशोभोद्यमाः ॥ ५१ ॥
विचाराचारसन्तोषज्ञानधर्मनयक्षमाः ।
सौजन्यौदार्यवैराग्यप्रश्रयधैर्यगुणार्जवाः ॥ ५२ ॥
उपकारेन्द्रियजयश्रीविनिर्व्याजसंयमाः ।
सौम्यमार्दवशौचाचापलानि विषयोज्झनम् ॥ ५३ ॥

एते सन्ध्यादयो गुणा राजादेर्यथौचित्यं वर्ण्यन्ते ॥

अथ दोषाः—

मायाभीदम्भदुष्कर्मलोभक्षोभमदभ्रमः ।
रागद्वेषारतीर्ष्याप्रमादाज्ञानमन्मथाः ॥ ५४ ॥

एते मायादिका दोषा नीचजनस्य भेदकत्वेन उत्तमस्यापि औचित्येन ख्याप्यन्ते । पूर्वोक्ताः सन्ध्यादिका गुणा अपि वैपरीत्येन दोषा भवन्ति ॥

अथ शेष्याः शब्दाः पुंनपुंसकलिङ्गशब्दाः—

नेत्राङ्गशृङ्गणगजेषुयूपाङ्कभाजं
　　व्योमानिलाम्बुदविहीपककलशकुम्भाः ।
चक्राङ्कचातकचकोरमयूरचञ्च-
　　पुंस्कोकिला कमलसरोऽम्बुजमन्दिराणि ॥ ५५ ॥

अथ स्त्रीलिङ्गशब्दाः शेष्याः—

ज्योत्स्ना नदी विधुकला सरसी पताका
　　वल्ली धनी कमलिनी वनिता सुधा श्रीः ।
कादम्बिनी सुरभिभूतिसुराबिसुता-
　　तारावलीकलिकालहरीव हृद्याः ॥ ५६ ॥

एतैः कान्तदृष्टपदार्थैरपि पूर्वोक्तसन्ध्याहंकृत्यादिकाव्यवस्तुप्रयोगाः कर्तव्या अपि गुणा दोषाश्च नपुंसका नपुंसकैः, पुंलिङ्गाः पुंलिङ्गैः, स्त्रीलिङ्गैः स्त्रीलिङ्गाः, कर्तव्याः भेदादि रूपकवस्तुविधिना योज्याः । भेदं यथा—कोपपावकवर्त्मनः । रूपं यथा—विवेकाम्भोजभास्करः । आधारो यथा—गुणरत्नपारावारः । आधेयं यथा—गुणा रत्नानिवाकरः ।

नपुंसकलिङ्गपुंलिङ्गशब्दाः स्त्रीशब्दमाश्रित्य स्त्रीलिङ्गाः शेष्या भवन्ति । यथा—

वीर्यकल्पान्तदीप्त्या शत्रुभीभोगिसाविभुः ।
मद सौभाग्यश्रीपुष्पो रामस्थितिवृतविष्णुधिः ॥

स्त्रीलिङ्गशब्दाः सप्तादिगृहिनिक्ष्पू पुं स्थिते, प्रवृत्तिकासारमध्यगतकरेऽपुंस्क-

लिङ्गा रोप्याद्या भवन्ति । यथा—

सन्धाविस्तारपाथोधिर्विधुरेष क्षमापतिः ।
विद्याप्रसरवृक्षाब्दः प्रज्ञोत्कर्षनभोरविः ॥

एतच्चतुर्विधानामपि द्विपङ्क्तिरूपकं भवति । प्रथमं भेदं द्विपङ्क्तिरूपकं यथा—

प्रतिज्ञावाहिनीपूरपरिप्लुतरिपुद्रुमः ।

इदमपि रूपकं वैपरीत्येन यथा—

द्वेषिवृक्षपरिप्लाविप्रतिज्ञावाहिनीरयः ॥
प्रतिज्ञाचन्द्रिकापूरम्लानवैरिमुखाम्बुजः ।
द्वेषिवक्त्राम्बुजद्रोहिप्रतिज्ञाचन्द्रिकारयः ॥
शौर्यदावानलप्लुष्टद्वेषिकीर्तिलतादयः ।
द्वेषिकीर्तिलताद्रोहिशौर्यदावहुताशनः ॥
धैर्यसूर्यपरिम्लानवैरिकैरवकाननः ।
वैरिकैरवकान्तारग्लानिकृद्धैर्यभास्करः ॥
शमस्रोतस्विनीपूरशान्तक्रोधहुताशनः ।
क्रोधदावानलच्छेदिशमस्रोतस्विनीरयः ॥
कलाकादम्बिनीशान्तद्विपत्तेजोहुताशनः ।
द्विपत्तेजोदवच्छेदिकलाकादम्बिनीभरः ॥
विद्यास्रोतस्विनीवाहभिन्नवादिमहीरुहः ।
वादिभूरुहविद्रोहिविद्याकूलङ्कषारयः ॥

अथ द्विपङ्क्तिस्तोभ्यरूपकं यथा—

कलाकमलिनीबोधशमवासरनायकः ।

इदमपि वैपरीत्येन यथा—

शमभास्करविस्मेरकलाकमलिनीवनः ॥
कलाकादम्बिनीलीलानृत्यत्पुंमनःशिखी ।
जनस्वान्तशिखिक्रीडाकलाकादम्बिनीभरः ॥
दशासिमन्यर्शमूलप्रानजिह्नघातकः ।
लोलबालकसंप्रीतिकामस्यपयोधरः ॥
विवेकरत्नानाथसंवर्धितशमाम्बुधिः ।
शमसागरविस्तारविवेकरजनीकरः ॥

अथ द्विरुक्ताधाररूपकं यथा—

गुणरत्नमनोहारिप्रतिज्ञावाहिनीरयः ।
कीर्तिविस्तारसम्भाविभाभसत्समनुजः ॥
यशोमौक्तिकविस्तारिदानपाथोनिधिः ।
सत्कीर्तिनिर्मलाम्भोभिर्धैर्यविन्ध्यमहीधरः ।

प्रतापतपनोद्द्योतिगुरुशौर्यसमोद्गुणः ।
विभीदरकीर्तिशीतांशोः शारदाभ्रपयोनिधिः ॥
देवभक्तिमदम्भोजषट्पदो मानसागरः ।
धैर्यदुर्यक्षयश्रीविलसद्गुणग्रामकः ॥
गुणगुम्फाद्भुतश्लेषविवेकनदीपतिः ।
कलाधरमदीराज्यप्रकारधैर्यहिमाचलः ॥

इदमेव द्विपदङ्गाधाररूपकं वैपरीत्येन द्विपदङ्गाधेयरूपकं भवति । यथा—

प्रतिज्ञावारिधिर्नीरप्रक्षोदद्गुणसिन्धुरः ।
मदङ्गारमहावह्निर्नीहारकीर्तिभ्रमाम्बरः ॥
दानपाथोनिधिर्नीहारशोभिगुणपारगुणः ।
धैर्यविन्ध्याचलोत्सङ्गप्रगल्भो निर्मदः ॥
गुरुशौर्यानिधामोऽस्मीकल्पद्रोदिवाकरः ।
दानरत्नाकरश्रीरविमीहारकीर्तिकदम्भमाः ॥
स्वामिभक्तिबुधिवितादैवभक्तिदेवपरीरवः ।
गुणकाननविश्रीहस्तारधैर्यभूताधिपः ॥
विवेकाम्बुधिविश्रीहृद्गुणगुम्फासमुद्भवः ।
धैर्यशैलविश्रीहरकीर्तिगङ्गारयो नृपः ॥

अथ त्रिपद्धिमिश्ररूपकम् । यथा—

सभ्यासिन्धुपतोऽम्भोजश्रीहृद्गुणसितच्छदः ।

इदं वैपरीत्येन—

गुणहंसमनोहारिसभ्यासिन्धुपतोऽम्बुजः ।
शौर्यशैलमहोरगस्तम्भवैरिभद्रोदरः ।
वैरिभूधरविद्रावि शौर्यशैलमहानलः ॥
कलावल्लीयशःपुष्पकन्दगुणमधुव्रतः ।
गुणद्विरेफरोचिष्णुकलावल्लीवशः नृपः ॥
धर्मसिन्धुपयोनीरश्रीहृत्कमलपेतदः ।
गुणपङ्केरुहभासिधर्मसिन्धुपयोकलः ॥
सदैवविमलतारकीर्तिः पुष्पोत्तमफलप्रदः ।
गुणचन्द्रकलौविम्बगुणासिपतृपकः ॥

अथ रूपकनिर्वाहविधिः । यथा—

प्रतिज्ञावारिसङ्क्रान्तः शौर्ये भुमिरूपम ।
बहालोकमार्गेण कार्य कीर्तिगुणरङ्गैः ॥
मानमानहविन्ध्याद्रिरेव स्वामिभक्तुरुत ।
कीर्तिविद्युत्कान्ते अस्य शौर्यदामोदरविद्यो ॥

औचित्यद्रुमकान्तारं भूमिपालो विराजते ।
शौर्यसिंहपरिक्रीडाध्वस्तवैरिमतङ्गजः ॥
धैर्यदन्तावलक्रीडाविन्ध्यविभ्रमभूधरः ।
सत्कीर्तिनर्मदापूरप्लुतक्षोणीतलो नृपः ॥
कलाकल्लोलिनीशैलः सैष राजा विराजते ।
महोमहौषधिज्वालाजालजीर्णा द्विषत्तमाः ॥

अथ भिन्नरूपकविधिः । यथा—

यद्दानकासारसमुद्भवानि भृशं यशःकैरवमण्डलानि ।
गुणावलीकेसरभासुराणि धितान्यहो याचकचञ्चरीकैः ॥
सङ्ग्रामपाथोनिधिसम्भवेन भवद्यशःकैरविणीधवेन ।
लीलापरिस्मेरितदिङ्मुखेन म्लानानि विद्वेषिमुखाम्बुजानि ॥

शेषानलङ्कारान् मत्कृतात् अलङ्कारप्रबोधादवबुध्याऽभ्यसेत् ॥

इति श्रीजिनदत्तसू० काव्यकल्पलतावृत्तौ चतुर्थे अर्थसिद्धिप्रताने-
ऽलङ्काराभ्यासस्तबकः प्रथमः ॥

अथार्थोत्पत्तिप्रकाराः प्रकाश्यन्ते—

वर्णाकारक्रियाधाराधेयसम्बन्धिबन्धवः ।
सम्पर्किद्वेषिमित्राणि पतिपत्नीशसेवकाः ॥ ५७ ॥
इन्द्रियानन्दभूत्यादिप्रदं तदपहारि च ।
एषामप्यमिमिश्राणीत्यादि वर्ण्येऽर्थयोजकम् ॥ ५८ ॥

सर्वेषामेव वस्तूनामेते वर्णादयो भावा एको द्वौ त्र्यादयो वा मिश्रिताः । वर्णः शुक्लादिः, आकारश्चतुरस्रादिः, क्रिया भ्रमणादिका, आधारो वृक्षादेः पृथिव्यादिः, आधेयं पृथिव्यादेर्वृक्षादि, सम्बन्धिनः पित्रादयः, बन्धवो भ्रातरः, सम्पर्किणः पार्श्वस्थाः, द्वेषिणो रिपवः, मित्राणि सुहृदः, पतिर्भर्ता, पत्नी भार्या, ईशः स्वामी, सेवका आराधकाः, इन्द्रियानन्दप्रदमुत्कटं चन्दनादि, सर्वेषामिन्द्रियाणां प्रीतिप्रदम्, भूत्यादिप्रदं कामधेन्वाद्यनेकवस्तुनिवहं, तदपहारि इन्द्रियानन्दापहारकं भूत्यापहारकं च ।

तथा—एषां वर्णादीनामपि यथायोगं ये द्विशो मिश्रा भवन्त्येऽपि यथा वर्णाकार-क्रियाणां साधारणस्य वस्तुजातानि द्विशो मिश्राणि च ।

तथा—आधारस्य द्विशो मिश्राणि, आधेयस्य द्विशो मिश्राणि, सम्बन्धिनो द्विशो मिश्राणि, बन्धूनां द्विशो मिश्राणि, सम्पर्किणो द्विशो मिश्राणि, द्वेषिणो द्विशो मिश्राणि, पत्युर्द्विशो मिश्राणि, पत्न्या द्विशो मिश्राणि, स्वामिनो द्विशो मिश्राणि, सेवकानां द्विशो मिश्राणि, इन्द्रियानन्ददायिनो द्विशो मिश्राणि, भूत्यापहारिणो द्विशो मिश्राणि ।

आधारादीनामपि सादृश्यादृस्वस्तरैः सह शत्रुत्वं मित्रत्वं च कल्पनीयम् । इत्यादिशब्दाद्वर्ण्यवर्गादिद्वेषिमित्राणां द्वेषिमित्रादि ।

तथा—वर्ण्यस्य शिशिरत्वमुष्णत्वं मधुरत्वं कटुत्वं सुगन्धत्वं सुरूपत्वं मधुरध्वनित्वं मृदुत्वमित्याद्योऽन्येऽपि भावा वर्ण्यवस्तुनि विविधार्थानामुत्पत्त्यर्थं बीजरूपा जायन्ते । यथा—वर्ण्यो रविस्तस्य पीतो वर्णः, आकारो वृत्तः, क्रियाः प्रकाशनरूपाद्याः, आधारो नभः, आधेयं हस्तकमलादि, सम्बन्धिनो महाकाश्यपशनिवमुनाद्याः, बन्धवोऽपरे सूर्याः, सम्पर्किणो रथो रथ्याऽरुणवालखिल्यादयः, द्वेषिणो राहुशुक्रशनयो ध्वान्तदैत्याश्च, मित्राणि चन्द्रमङ्गलगुरवः, कमलचक्रवाकाद्याश्च वा, रविरेव प्रभाकमलिन्योः पतिः, परस्य प्रभाकमलिनीरसादेभ्यः, ईशः पितामहत्वात् ब्रह्मा, सेवका भाविनः, इन्द्रियानन्दप्रदा मित्राद्याः, शोभाप्रदा दिवसाद्याः, इन्द्रियानन्दहरा तिमिराद्याः, तथा वर्ण्यस्य श्वेतवर्णस्य द्विषो मित्राणि, सदृग्वर्णानि आकारस्य द्विषो मित्राणि सदृगाकाराणि, मित्रस्य कमलस्य द्विषश्चन्द्राद्याः, मित्राणि चक्राद्याः, सम्पर्किणो हंसाद्याः, आधारो जलम्, आधेयं भृङ्गाद्याः । एवं परस्परमेकैकस्य भावस्य यथासंभवमपरे भावा निरीक्ष्याः । एवं कमलमित्रद्वेषिणश्चन्द्रादेरपि वर्णादीनि विलोक्यानि ॥

वर्णादिकानामेकेन द्वाभ्यां वा त्र्यादिकैरपि ।
सुधीरुत्पादयेदर्थमौचित्याद्वर्ण्यवस्तुनि ॥ ५९ ॥

वर्ण्यवस्तुनो वर्णाकारादीनां मध्यादेकेन केनापि कान्याश्रिद् द्वाभ्यां वा कैश्चित् त्रिभिश्चतुर्भिः पञ्चभिर्वा भावैरर्थः पूर्णतां नेयः ॥

वर्णाकारक्रियामुख्यैः सदृशं वस्तु वस्तुनि ।
संयोजयेद्यथौचित्यमुपमारूपकादिभिः ॥ ६० ॥

वर्ण्यवस्तुनि शुक्लादौ शुक्लादि, चतुरस्रादौ चतुरस्रादि, कम्पनादौ नर्तनादि इत्यादि सदृशान् भावानुपमया रूपकेण वा अलङ्कारान्तरैर्वा योजयेत् ॥

वर्णादिभिरुपमानीकृतवस्तुप्रथितवर्णमुख्यगुणाः ।
उपमेये सादृश्यात् श्लेषादौचित्यतो योज्याः ॥ ६१ ॥

श्वेतादीनां श्वेतादयः, चतुरस्रादीनां चतुरस्रादयः, आधारपरिवारादीनाम् आधारपरिवारादयः औचित्यादुपमानं क्रियन्ते । उपमानीकृतवस्तुनो वर्णाद्या गुणाः सादृश्येन श्लेषेण वा उपमेये रोप्यन्ते ॥

एवं वर्णोऽन्यस्तत्रापि शुक्लवर्णाद्यौत्पत्तये शुक्लपदार्थोपसङ्ग्रहो यथा—

शुभ्राणि भारतीधर्मशेषेशयशइन्दवः ।
चन्द्रप्रभसुविध्याख्यौ जिनेन्द्रौ बलनारदौ ॥ ६१ ॥ ॥
ब्राह्मणानां वर्णो धर्मः पितरश्च कृतादयुगः ।
सत्यं कृतयुगं शान्तहास्यघोररसास्तथा ॥ ६२ ॥
शुक्लध्यानं शुक्ललेश्या पुण्यं सिद्धिशिलोशनाः ।
चन्द्रश्चोर्ध्वं भव शाब जगज्ज्योत्स्नाशरमाः ॥ ६३ ॥

प्रासादसौधकैलाससमन्दारद्रुहिमाद्रयः ।
रम्भागर्भपारिजातलोध्रकल्लोलपादपाः ॥ ६४ ॥
कार्पासकाशकर्पूरकरम्भा रजतं यशः ।
निर्मोकक्षीरडिण्डीरचन्दनं हसितं हिमम् ॥ ६५ ॥
दधिप्रसूनचूर्णास्थिखटिकास्फटिकाभ्रकाः ।
रेणुः केतकखर्जूर्योः कटाक्षा वासभस्मनी ॥ ६६ ॥
मृणालपलिताम्भोदधारेन्दुकरचामराः ।
हारोर्णानाभतन्तूर्मिस्वर्दण्डेभरदा गुणाः ॥ ६७ ॥
सेराहशर्कराशालिदुग्धगङ्गासुधा जलम् ।
निर्झरः पारदो हंसबककैरवकम्बवः ॥ ६८ ॥
लतागृहं पुण्डरीककपालश्वेतकुम्भकाः ।
छत्रसिंहध्वजश्वेतगुञ्जाशुक्तिकपर्दिकाः ॥ ६९ ॥
मुक्ताकुसुमनक्षत्रदन्तस्वेदाम्बुबिन्दवः ।
सूर्येन्दुकान्तकरकसिकताकणसीकराः ॥ ७० ॥
मालतीमल्लिकाकुन्दयूथिकाकुब्जकादयः ।

एते भारतीप्रभृतयोऽन्येऽपि श्वेतपदार्थाः परस्परमौचित्यादुपमानं क्रियन्ते । उपमानीकृतपदार्थस्य वर्णादयो गुणा वर्ण्येऽपि रोप्यन्ते । यथा—वर्ण्या भारती, तस्या उपमानं गङ्गा, गङ्गायाः शुक्लो वर्णः, परिवारो हंसप्रभृति, आधारो धूर्जटिशिरः, क्रिया पापहारित्वम् । ततो भारती कुन्देन्दुसुन्दरद्युतिः पद्मधिया हंससेविता शिवोत्तमाङ्गलालिता गङ्गेव सेवकपापहारिणी जयति ।

यथा—वर्ण्यास्तारकास्तासामुपमानं मुक्तास्तासामाधारोऽब्धिस्ततो नभोम्भोधिमध्ये तारा मुक्ता इव ।

यथा—वर्ण्याः काशास्तेषामुपमानं हास्यं हास्यं च प्रियसङ्गते भवति, ततो नवहंससमागमे शरद्वध्वा हासप्रकाशा इव काशाः ।

यथा—वर्ण्यं हास्यं तस्योपमानं ज्योत्स्ना तस्या आधारश्चन्द्रस्ततो मुखचन्द्रस्य ज्योत्स्नेव हास्यश्रीः ।

यथा—वर्ण्यं यशस्तस्योपमानं हास्यं हास्यस्य हर्षस्ततो रिपुक्षयहृष्टस्य नृपशङ्करस्य हास्यमिव यशः ।

यथा—वर्ण्यं यशस्तस्योपमानं कर्पूरः कर्पूराधारः समुद्रकः परिवारोऽङ्गारास्तस्मिँल्लोकद्वयोदरसमुद्रके यशः कर्पूरमिव तन्मध्ये नभोऽङ्गारखण्डः ।

यथा—वर्ण्यास्तारास्तासामुपमानं पुष्पाणि तेषामाधारो लता ततस्तमोवल्ल्याः पुष्पाणीव ताराः ।

यथा—वर्ण्यानि पुष्पाणि तेषामुपमानं स्वेदबिन्दवस्ते नायिकाभावाद्भवन्ति, ततो दक्षिणानिलस्य स्पर्शादुद्भूतसात्त्विकभावाया वल्लीनां स्वेदबिन्दव इव पुष्पाणि,

यज्ञपात्रस्थमौक्तिक इव निलयस्थमौक्तिक इव व्यालवालानुद्‌ पादतोयेन दृष्टा बोधादिव वर्णिनी ? देवविम्ब इव पुष्पाणि । अथवा पुष्पाणि नगस्य उपमानं तारकाणामाकाशस्यानगे वनवाटे पुष्पाणि तारका इव । अथवा स्विन्नाङ्गनानां ललाटजलकणानामभिज्ञातास्ता इव पुष्पाणि । अथवा कमोदकाग्रस्थकणानामवद्भासमानकुसुमाभिज्ञातास्ता इव पुष्पाणि ।

यथा—वर्ण्यं प्रासादस्तस्योपमानं हिमाचलस्तस्य परिवारो मधुपा ततः प्रासादो हिमाचलस्य मध्ये पताका ।

यथा—वर्ण्यः प्रासादस्तस्योपमानं धर्मस्तस्य प्रासादो धर्मो लोकपालदेविनो भिन्ना पताकाच्छलाच्छमौलिरवपि यशो व्याप्नोति ॥

अथ कृष्णवर्णोपमानवस्तु कृष्णपदार्थोपमानयुक्तो यथा—

कृष्णाब्धि केशवः शौरिर्गौरिचन्द्राङ्कराहवः ॥ ७१ ॥
विन्ध्याऽञ्जनाद्रिमुनमनेमिनाथौ जिनेश्वरौ ।
धूमकेतुर्मदापद्मान्नताणौ यमानुगौ ॥ ७२ ॥
सर्पैरावणनारायश्च शिखिकण्ठतमालिनः ।
कालिः कलिन्दिद्वीपायमरामघनत्रपाः ॥ ७३ ॥
शुक्राणां वर्णो धर्मः पितरश्च तमोगुणाः ॥
चामुण्डी देवी द्रुपदजा नागपाशो विदूरजम् ॥ ७४ ॥
पिनाकरच्छुन्नागुरुपापतमोनिशाः ।
धूमश्च जलदश्च नीपद्रा बहुलदुर्दिने ॥ ७५ ॥
मषीमदगुरापाडिपमुखाग्राञ्जनाश्रयः ।
गुञ्जमाणिला गुञ्जमरिचे वनशालिनौ ॥ ७६ ॥
नयनं तालताविश्वदलेन्दीवरपल्लवः ।
नीली जम्बूफलं गुञ्जामुखाङ्गारौ खलाजिने ॥ ७७ ॥
मारिन्दुर्धमालीवनलाः कृत्या कुचीरतयः ।
मारकुच्यानदुग्र्ध्वनिकृष्णलेश्या विपद्मपथा ॥ ७८ ॥
कूर्मो वराहमद्याङ्गमहिषाः पिकवट्पदौ ।
गोलाङ्गूलमुखं दन्ती कण्ठकाटककेकिनौ ॥ ७९ ॥
काकः पिपीलिका दुर्गापलितरण्डनश्रृङ्गिकाः ।
मकरः कृष्णसारस्तु भिक्षाश्छाया च गोमयम् ॥ ८० ॥
रामारोमावलीनेत्रपक्ष्मभ्रूरोममूर्धजाः ।
रसापद्भुजगश्टृङ्गारौ कटाक्षासितकलोनिकाः ॥ ८१ ॥

यथेऽन्येऽपि कृष्णपदार्थाः परस्परमौचित्यानुपमानं क्रियन्ते । उपमानीकृतपदार्थेष्व वर्णादयो गुणा उपमेये ऽप्यन्ते । यथा—वर्ण्या कीर्त्या तस्या उपमानं कृपाणः कृपाण…

स्याधारो वीरस्तेन मदनवीरेण भवनिष्फलीकृतपञ्चशरेण श्रीवेणीमिषात् कृपाणदण्ड इव प्रगुणीकृतः ।

वर्ण्यं तमस्तस्योपमानं धूमः, धूमाधारोऽग्निस्ततः सन्ध्यावन्हेर्धूमैरिव तमोभिर्व्याप्ता दिशः ।

वर्ण्यं तमस्तस्योपमानं कज्जलं, कज्जलाधारस्योपमानं धूमः, धूमाधारोऽग्निस्ततः सन्ध्यावन्हेराधारो दीपस्तत औषधीदीपसमुद्भूतैः कज्जलैरिव तमोभिर्मलिना दिशः । अथवा रविवियोगार्तानां दिग्वधूनां साञ्जनाश्रुसलिलानीव तमांसि ।

वर्ण्यं इन्दुकलङ्कस्तस्योपमानं नीलपद्मं तस्याधारः सरस्ततो मनोरण्ये सधारस्तत्र लाञ्छनच्छलादुत्तंसो नीलोत्पलम् । अथवा यामिनीकामिन्या मुखमिव चन्द्रस्तत्र लाञ्छनच्छलादुत्तंसो नीलोत्पलम् । अथवा लाञ्छनस्य पापमुपमानं पापस्य दुष्कृतादुत्पत्तिः, ततो रविवियोगार्तपद्मिनीनां लक्ष्मीहरणपातकादिव चन्द्रस्य लाञ्छनच्छलान्मूर्तं पातकमिव दृश्यते । तथा इन्दुकलङ्कस्योपमानं कस्तूरिका तस्या आधारो रूप्यकच्चोलकम् । ततो यामिनीकामिनी स्वमण्डनार्थं चन्द्रस्य कच्चोलको लाञ्छनव्याजात्कस्तूरिकापङ्कमिव प्रगुणीचकार । अथेन्दुलाञ्छनस्य विषमुपमानं तत आत्मानं कृष्णमात्रेण त्रिदिवं आत्मन्येवमायस्थीकरणाय लाञ्छनच्छलात्कालकूटं चन्द्रमिव सेवते । अथवा यामिन्याः स्वपतेश्चन्द्रस्य चक्षुर्दोषापनयनार्थं लाञ्छनव्याजात्कज्जलाङ्कः कृत इव ।

वर्ण्यं नीलोत्पलं तस्योपमानं लाञ्छनं ततः कामिनीचन्द्रे नीलोत्पलं लाञ्छनमिव ।

वर्ण्यो धम्मिल्लस्तस्योपमानं राहुस्ततः कालवशादिव मतैः सुमुखीमुखार्थे चन्द्रभ्रमाद्धम्मिल्लच्छलेन राहुरिव समागतः ।

वर्ण्यो श्रीकण्ठकण्ठविमलस्या वनमाले तमस्ततस्त्वं हे प्रभो सर्वेषामपि सामान्यप्रसन्नः किमस्मद्वैरिणं चन्द्रं शिरसा धरसि इति विज्ञप्तये स्थानमिव कण्ठविकालाहीश्वरमाश्रितम् । अथवा कन्दर्पं निजकुलकलङ्कमिवनाय जलधिरिव समागतः । अथवा कण्ठविकालान्तःप्रविश्यैव यमुना हिरं समागता ॥

नीलवर्णपदार्थोपमाने नीलपदार्थसङ्ग्रहो यथा-

नीलानि बुधशनौरी मणिपार्श्वौ जिनेश्वरौ ।
नीलकण्ठपयानू च नीलको नीलवानरः ॥ ८२ ॥
शुको नीलाश्मकः दूर्वा प्रियङ्गुर्गुञ्जरीवनं ।
वंशाङ्कुरा मरकतेन्द्रनीलौ रविवाजिनः ॥ ८३ ॥
वाद्यो मुकुन्दस्य नीलाम्बरश्च धामसूत्रादयः ॥

नीलवर्णादि नानार्थो [illegible] किमपि क्रियते । [illegible] वर्णेषु यथा-वर्ण्यः [illegible] नीलोत्पलं तस्याधारः [illegible] नीलोत्पलोपमानि [illegible] ।

वर्ण्यं [illegible] तस्मात् [illegible], ततः [illegible] इन्द्रनीलमणिमयेन [illegible] ॥

रक्तवर्णोत्पत्तये रक्तपदार्थसमूहो यथा–

लोहितानि भौमभौमाश्वाः शक्रगोपकपन्नगाः ॥ ८४ ॥
पद्मप्रभा वासुपूज्यौ जिनेन्द्रौ नवभानुमान् ।
वेला वेला हरिः रक्तवर्णधर्मविद्रुमाः ॥ ८५ ॥
सन्ध्योष्ठाधरपो विद्युत्ताम्रे विद्रुमकुङ्कुमे ।
पद्मरागप्रवालकबन्धूकालककद्रवाः ॥ ८६ ॥
दृगन्ताधरजिह्वाङ्घ्रिकराग्निसिन्दूरधातवः ।
हिङ्गुलं मधु रक्तानि स्फुलिङ्गा दन्तिबिन्दवः ॥ ८७ ॥
नवेन्द्रगोपकपोलाः कुक्कुटस्य शिखा तथा ।
चकोरसारसपारावतकोकिलदृष्टयः ॥ ८८ ॥
बिम्बादो हंसचञ्च्वङ्घ्री शुकमर्कटयोर्मुखम् ।
कुसुम्भविद्रुमाशोकजपाबन्धूकपाटलाः ॥ ८९ ॥
पक्वा दाडिमीपुष्पं बिम्बीकिम्पाकयोः फले ।
गुञ्जा कोकनदं रौद्ररसो रागपटेरिकाः ॥ ९० ॥
ताम्बूलरागो मञ्जिष्ठा पञ्चाननकरतले ।
तेजोलेश्याः पद्मलेश्याः क्रोधः कुम्भपुर्मदः ॥ ९१ ॥
वश्याकर्षणयोर्ध्याने सपाकफलमण्डली ।

एतेऽन्येऽपि रक्तपदार्थाः कान्तामौक्तिकाद्युपमानं क्रियन्ते । उपमानीकृतपदार्थस्य वर्णादयो गुणा उपमेये रोप्यन्ते । यथा—वन्याः किंशुकास्तेषामुपमानं कौसुम्भवासांसि ततो वसन्तप्रियसमागमे वनस्थलीभिरन्तर्भावितकिंशुककुसुमत्वेनेति मिषेण करैः कौसुम्भवासांसि परिहितानि ।

वन्यो कङ्केल्लिस्तस्या उपमानमनुरागस्ततो वसन्तानुरक्तया वनश्रिया कङ्केल्लिकदम्बेन मूर्तोऽनुराग इव प्रकटीकृतः । अथवा वनश्रियो हृत्समन्दं कुङ्कुमस्तबक इव कङ्केल्लिः ।

वन्यो सन्ध्या तस्या उपमानं वह्निस्ततः प्राणनाथेऽस्तमिते रवौ दिनवधूभिरनुरागमयोऽपि सन्ध्याच्छलेन प्रगुणीकृतो वह्निरिव । अथवा चक्रवाकहृदयेभ्यो विरहाग्निज्वालाकलाप इव सन्ध्याच्छलेन नभोऽभिव्यापी बभूव ।

वन्यो जपा तस्या उपमानं रक्तानि ततः वासरश्रीकनककदम्बया जपाकुसुमच्छलेन रक्तानीव प्रदत्तानि ।

वन्यो बालार्कस्तस्योपमानं कुक्कुटशिखा ततः प्रातः किरणाङ्कुरमूर्तिमौनावलोकनपक्षेणोदयगिरिकुक्कुटस्य शिरःस्थितो रविः शिखाशोभां लभते ॥

पिङ्गवर्णोत्पत्तये पिङ्गवर्णपदार्थसमूहो यथा—

पीतानि ब्रह्मसूर्येन्द्रगरुडेश्वरस्फुरज्जटाः ॥ ९२ ॥
पद्माभो गुरुर्विष्णोर्वस्त्रं पीतरजोगुणाः ।
गिरिजाऽगस्तिरिन्द्राश्वा द्वापरो द्वापराच्युतः ॥ ९३ ॥

भयानकरसो वैश्यवर्णधर्मविभूषणाः ।
ऋषभप्रमुखास्तीर्थंकराः षोडश वासराः ॥ ९४ ॥
सुराद्रिः काञ्चनं कांस्यं रीतिः किञ्जल्कचम्पके ।
परिव्राजकवस्त्राणि हरितालमनःशिले ॥ ९५ ॥
हरिद्रा रोचना हीरो गन्धकं दीपचम्पके ।
कर्णिकारं सुवर्णाञ्जरम्भाकेतकशालयः ॥ ९६ ॥
हरयो व्याघ्रनामा वानरः सारिकाकपी ।

एतेऽन्येऽपि पीतपदार्थाः परस्परमौचित्यादुपमानं क्रियन्ते । उपमानीकृतपदार्थस्य वर्णादयो गुणा उपमेये रोप्यन्ते । यथा—वर्ण्यो रविस्तस्योपमाने कोकस्तस्याधारः सरस्ततो नभःसरोवरे रविश्चक्रवाक इव ।

वर्ण्याः कोकास्तेषामुपमानं परागस्ततः सरसि स्मेरसरसिजपरागस्तवका इव चक्रवाकाः ।

वर्ण्यः परागस्तस्योपमानं कुङ्कुमास्तस्याधारो नारीशरीरं ततः काननलक्ष्म्या वसन्तप्रियागमे परागप्रसरपरिष्वङ्गमिषेण कुङ्कुमलेप इव चक्रे ।

वर्ण्यो रविस्तस्योपमानं गरुडस्तस्य क्रिया सर्पवधस्ततस्तिमिरसर्पाणां गरुड इव रविः ॥

अथ धूसरादिभ्योऽर्थोत्पत्तये धूसरादिपदार्थसङ्ग्रहो यथा—

धूसरा रेणुमण्डूककरभा गृहगोधिका ॥ ९७ ॥
गर्दभो मूषको दुर्गाकाककण्ठकपोतकाः ।
पुलकोऽहिः शिखिपिच्छाऽधोभागः करुणो रसः ॥ ९८ ॥
कपोललेश्योर्णाभशकुनाः कर्बरी तथा ।

वर्ण्या मण्डूकास्तेषामुपमानं करुणो रसस्तस्याधारो दुःखितस्ततो वर्षाकाले चलमण्डूकावलिच्छलेन विरहार्त्तानां हृदयेभ्य उद्भ्रान्तः करुणो रस इव ॥

बहुवर्णाः शिखिपिच्छेन्द्रचापश्रीदचित्रकाः ॥ ९९ ॥

वर्ण्यं धनुस्तस्योपमानं शिखिपिच्छं ततस्तस्याधारो गोपवर्गः ततः कृष्णमेघस्य गोपालानां प्रपन्नस्य शिखिपिच्छाभरणमिव इन्द्रधनुः ॥

उत्कर्षमुपमेयस्य परिकल्पयितुं सुधीः ।
विशेषणैः परिष्कारमुपमानस्य कल्पयेत् ॥ १०० ॥

उपमेयस्य शोभातिशयख्यापनाय कयाऽपि युक्त्या विशेषणैरलङ्कृतमुपमानं कुर्वीत । यथा—

हरनिकरकराग्रव्यग्रमन्थानशैलक्षुभिततरलदुग्धाम्भोधिकल्लोलकान्तिः ।
हिमकिरणरुचिव्यूहविभ्राजमानक्षितिधरपतिचूडाजाह्नवीकल्पकान्तिः ॥
तुहिनगिरितनूजाननप्रभूतेशवक्त्रागलितगगनगङ्गाधौतबालेन्दुगौरः ।
गिरिशमुकुटचन्द्रज्योतिरुद्योतमानस्फटिकशिखरचूडास्पर्धमानाङ्गकान्तिः ॥

इति श्वेतवर्णः ।

मुकुटगलितगङ्गाम्भःकल्लोलमालास्नपितगिरिशकण्ठस्पष्टसन्देहवद्भिः ।
अभिनवजलवाहव्यूहधाराविमुक्ताञ्जनशिखरिसरीयःशृङ्गशृङ्गारलक्ष्मीः ॥
द्विपरिवृढपुरीगर्भलीलारविन्दभ्रमरमधुपराजीपक्षतिप्रस्फुरत्कान्तिः ।
जलदपवनशौरिस्फाररोचिःप्रपञ्चस्फुरितसलिलराशिनिभा भ्रमाभाङ्कवद्भिः ॥

इति कृष्णः ।

मसृणघुसृणपङ्कप्रस्फुरत्काशीकृतकनकपिधानोद्दामकौसुम्भकान्तिः ।
तरुणतरणिकान्तिप्रान्तसंसर्गफुल्लत्कमलदलकदम्बप्रायकायप्रभाभिः ॥
अभिनवरविबिम्बप्रोतिनप्राक्प्रभृत्स्यास्त्यलक्तदशोकस्मेरपुष्पोपमानः ।
पतिकुपितमृगाक्षीलोचनप्रान्तरोचिस्फुरितकमलकर्णोत्तंससङ्गावभाभिः ॥

इति रक्तः ।

सुररिपुपदनिर्यज्जाह्नवीनीरपूरस्थगितगदपक्षप्रकचमण्डलक्ष्मलक्ष्मीः ।
तरुणकिरणमालिस्फूर्जदुग्रपरीतः स्मितकनकसरोजव्यूहपुञ्जप्रायकान्तिः ॥
अम्बरनिकुरम्बोदारधारानिपातप्रविसरत्कल्लोलस्पर्धिरोचिष्णुकान्तिः ।
तरुणतरघनाघीगण्डरोचिःप्रपञ्चस्फुरितकनककर्णोत्तंससङ्गर्वधर्णः ॥

इति पीतवर्णः ।

सदृशं सदृशेनोपमेयम् । यथा—

अमरनिकरपाठाविस्फुरत्कामधेनुस्तनगलितपयोवसारती यस्य रेजे ।
हिमकिरणमयूखप्रान्तभिन्नेन्दुकान्तप्रसरदमृतगुल्या यस्य बाचो विभान्ति ॥
दनुजतनुजविपक्षक्षुभ्यत्कुम्भास्थिमौलिप्रसरशुभ्रसमाना रेजिरे यस्य बाणाः ।
मदनमथनमूर्धारूढरोचिष्णुगङ्गाकदम्बविभ्रमसमाना शोभते यस्य वाणी ॥

एवमन्यदपि ॥

इति श्रीजिनदत्त० अर्थसिद्धिप्रताने चतुर्थे वर्ण्यस्तबको द्वितीयः ॥

---

अथ आकारेष्वस्तवादि प्रथमं चतुरस्राकारादर्थोत्पत्तये चतुरस्राकारपदार्थसङ्ख्या यथा—

चतुरस्राणि व्यजनं कुम्भिका च पताकिका ।
चातुरी मञ्जिका सिंहासनं पार्थिवमण्डलम् ॥ १०१ ॥

एतेऽन्येऽपि चतुरस्रपदार्थाः परस्परमौपम्यानुपमानं क्रियन्ते । उपमाचोक्तमनदा-धीस्व वर्णादयो गुणा उपमेये रोप्यन्ते । यथा—सर्वं पार्थिवमण्डलं सम्बोपमान मिह सभे तस्याथेयं राजा ततः सर्वकार्यकरणक्षमस्य सन्त्राधिराजस्य सिंहासनमिव पार्थिवमण्डलम् ॥

प्रलम्बचतुरस्रपदार्थसङ्ख्या यथा—

प्रलम्बचतुरस्राणि खट्वा रथ्याष्टपुत्रिका ।
कपाटपट्टिकापेटापट्टाः प्राकारपुरतके ॥ १०२ ॥

इष्टका तिलकं केतुः पटः पाणिः प्रसारितः ।
प्रशस्तिपट्टिका शय्या पट्टः शकटमश्वकौ ॥ १०३ ॥
गवाक्षसारफलकं कटद्वारपटादयः ।

एतेऽन्येऽपि-इत्यादि। वर्ण्यं पुस्तकं तस्योपमानं मञ्जूषा साऽपि रत्नस्थानं, ततो नकाव्यरसा मञ्जूषेव पुस्तिका ।

वर्ण्यं तिलकं तस्योपमानं तूलिका, ततो मदननृपतेर्भालागारसौधोपरि क्रीडार्थं गुरुघनमुक्तातिलकच्छलेन विशदप्रभाच्छलोत्तरच्छदा तूलिकेव प्रगुणीकृता ।

वर्ण्या तूलिका तस्या उपमानं चतुरस्रतिलकं, ततो गृहलक्ष्म्याश्चन्दने तिलकमेव तूलिका ।

वर्ण्यं ललाटफलकं तस्योपमानं प्रशस्तिपट्टिका, ततः कन्दर्पदेवतायतने बाला-शरीरे कस्तूरिकापत्रवल्लीमिषाऽक्षरमालिका प्रशस्तिपट्टिकेव ललाटफलकम् ॥

वृत्तपदार्थसङ्ग्रहो यथा—

सम्पूर्णगर्भवृत्तानि मुखपद्मेन्दुदर्पणाः ॥ १०४ ॥
कपोलकुण्डले तालसूर्यभाजनगान्द्रिकाः ।
झल्लरी कमठं पुण्ड्रं लूतागृहदलस्फुराः ॥ १०५ ॥
छत्रव्यजनचालिन्यो मृदङ्गपुटपूपकाः ।
घरट्टमण्डको कन्दुरालवालः सरो मही ॥ १०६ ॥
द्वीपः शरावः कंसालकरिश्रवणकौशिकाः ।
कुलालरथघण्टानां चक्राणि शाणयन्त्रकम् ॥ १०७ ॥
तुलापेलाऊकैवर्तजालावर्तारघट्टकाः ।

एतेऽन्येऽपीत्यादि । वर्ण्यः सूर्यस्तस्योपमानमादर्शः स स्त्रीपार्श्वे भवति, ततः पूर्वदिङ्नार्या आदर्श इव प्राभातिको रविः । अथवा तस्योपमानं कुण्डः सोऽपि स्त्रीमुखे भवति, ततः पूर्वदिगङ्गनामुखे पद्मरागकुण्डलमिव रविः ।

वर्ण्यश्चन्द्रस्तस्योपमानं छत्रं तदपि राज्ञो भवति, ततो मदनभूपतेश्छत्रमिव चन्द्रः । अथवा चन्द्रस्योपमानं स्फुरा सापि सुभटस्य भवति, ततो मन्मथभटस्य स्फुरामण्डलमिव चन्द्रः ॥

गम्भीरमध्यवृत्तानि नाभिस्थालीगुहाह्रदाः ॥ १०८ ॥
कुण्डं वापी धृतिः कूपो मुखं गर्भकचोलके ।
कमण्डलुघटग्रीवावदनाभिदलूखलः ॥ १०९ ॥
कटाहमणिको कुण्डी कम्बुः कूतपपङ्कजे ।
चषकं कुम्भभृङ्गारौ श्रीभाजनमान्यमण्डले ॥ ११० ॥
हारका तेमिका पद्मा करण्डो भूपवर्तकः ।
कपालखर्परे तुम्बसमुद्गचरका दृतिः ॥ १११ ॥
भगदाशिरस्कपर्दस्तुमनोभेरिकाहलाः ।
नालप्रणालनलिकाः शरधिर्भ्रमणो घटी ॥ ११२ ॥

गर्तापिधाने चक्रेरीकुम्पिकालोकनालयः ।
तिलेक्षुपेषुकृद्यन्त्रे पालकं द्यूतगर्तिका ॥ ११३ ॥

एतेऽप्येऽपीत्यादि । वर्ण्या नाभिः तस्या उपमानं कूपस्ततः स्तनावटोपरि लुठित-रोमालिमालाकाण्डवज्रकपूर्णः शृङ्गाररसेचनाय मदनारामिकेण नाभीरूपः कूप इव प्रगुणीकृतः ।

वर्ण्यानि पद्मानि तेषामुपमानं चषकानि ततो जलदेवतानां मधुपूर्णानि चषका-णीव पद्मानि ॥

विविधताकृतिवृत्तानि गोलस्तबककन्दुकाः ।
कन्देभकुम्भघम्मिल्लनितम्बस्तनमौलयः ॥ ११४ ॥
तूर्यं घण्टिका मुण्ड्यंसकरोटिककुण्डकाः ।
राहुर्मण्डपपिण्डौघःकपिशीर्षघटाः फलम् ॥ ११५ ॥
गुल्मं फालं पयःसारस्याङ्गा हंसजाहकौ ।
मोदकः कलशस्तुम्बकमण्डलुसमुद्गकाः ॥ ११६ ॥
नारङ्गचूतकरुणबिल्वजम्बीरदाडिमाः ।
बीजपूरीनारिकेलयापित्थादिशुभफलावलिः ॥ ११७ ॥

एतेऽप्येऽपीत्यादि । वर्ण्यौ स्तनौ तयोरुपमानं कुम्भौ ततः शृङ्गाररसपूर्णौ तटस्थ-नितम्बस्थलेऽवाकृतिरोमावलिरम्यौ मुखस्थितचूचुकच्छलेनेन्द्रनीलपिधानौ नार्याः कुम्भा-विव कुचौ ।

वर्ण्यौ वप्रस्तस्योपमानं वलयं तस्याधारो बाहुस्ततो भद्रभावन्या अस्तोत्तंसित-वलयमिव वप्रः । नार्याः शृङ्गारबलेचुचुककवचनिर्लीनशृङ्गौ कुसुमस्तबकाविव कुचौ । रतिप्रीतिभ्यां कामदेवस्य त्रिभुवनराज्याभिषेकाय चूचुकच्छलमुखस्थितामृतपूर्णौ कनककुम्भाविव कुचौ ।

वर्ण्यश्चन्द्रस्तस्योपमानं हंसस्ततो नभःकासारे ज्योत्स्नाजलसम्भूते कलङ्कच्छलेन कलितशैवलवल्लरीपल्लवो हंस इव चन्द्रः ॥

गर्भप्रकाशपूतानि घटीमुकुटकण्टकाः ।
ताडपत्रकटकाङ्कुशाः चङ्क्रमभूमिका ॥ ११८ ॥
हस्तसूत्रं नूपुरे द्रुमदारस्तार्थकण्डके ।
पुष्पस्रङ्मेखला हारो दण्डमालावपट्टको ॥ ११९ ॥
कटकाः सूत्रगुणो मौञ्जीक्रमपर्वमालिके ।
परिवेषः कुण्डलका प्राकारपरिखावृतिः ॥ १२० ॥
कर्णपाशो बाहुपाशो पालिकाञ्चालिकाङ्गुलाः ।
घटकणः कृष्णवर्णं यथाक्रमव्योममण्डले ॥ १२१ ॥
दिग्पार्श्वमण्डलश्रोणीकुण्डलीभूतकुण्डली ।
पर्यङ्किका योगपट्टयज्ञोपवीतदामकः ॥ १२२ ॥

एतेऽप्येऽपीत्यादि । यथा—वर्ण्यौ वप्रस्तस्योपमानं कर्णस्याकार,

...वृत्तैः करिशीर्षमुक्तमालान्वितः करी इव घनः ।
...तौ वृत्तत्वमौक्तिकमानं वर्णं तस्याधारो राहुस्तनौ बहुभावस्था अस्तोऽसित-
...मुक्तामिलं वक्षमिव वरः ।
...वौ कर्णतालौ तयोरुपमानं व्याकुलचाले तनौ मत्तगौरवाभ्यां अनवधमनोयुग-
...शिदिपक्षाश्चपाले कर्णद्वयमिनेव वनुरी इव कुण्डलिते ॥

सुवमथ्येतानि वृत्तानि मुक्तामलकतारकाः ।
दाडिमीफलबीजानि हस्तबिन्दुघराटकाः ॥ १२३ ॥
करटास्थिपयोबिन्दुबुद्बुदस्तनबिन्दवः ।
प्रसूनं तिलकं पीलुफलं जातीफलं कणाः ॥ १२४ ॥

...मलसीत्यादि । यथा—[illegible] मुक्तामतः हि मधुरे ... तनौ [illegible] ... इव ताराः । अथवा ताराणामुपमानं जलबिन्दवः ... तनौ [illegible] पश्चिमा... जलबिन्दव इव ताराः ॥

सुवमस्तानि वृत्तानि मत्तलोलविन्दवः ।
गुञ्जेन्द्रगोपलघोलः कङ्कलिकृतलोचने ।
तुरगोलाश्मवन्धूकबदरीविम्बयोः फले ॥ १२५ ॥

...इत्यादि । यथा—[illegible] तनौ [illegible] ।
...इव ... ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible] ।
[illegible] ॥ १२६ ॥

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

त्रिकोणान्यथ रम्भोरुजिह्वालेख्यानलौ हलम् ।
सन्ध्यासराघट्टाद्रौ कामाग्नीचिह्नमण्डले ॥ १२७ ॥
करपत्रमिरद्धात्रितलक्षोणिरथपाणयः ।
सुरमग्रहगोक्षुरत्रोहिणीत्रिकटानि च ॥ १२८ ॥

एतेऽस्येऽर्थोत्स्वादि । यथा–इयं त्रिकोणतिलकं तस्योपमानं रोहिणी, ततो नाभिकाकुण्डे त्रिकोणकुण्डतिलकच्छलेन निजरतिमिव रोहिणीव समागता । अथवा स्मरेण त्रिपुरारेरनलज्वालेन बालाया हृदयं सज्जीकृत्य त्रिकोणतिलकच्छलेन सुरचापमिव प्रगुणीकृतम् । अथवा निरन्तरं जनमनोवेधकारित्वात्पापेयमालेप-नवनाकाशगाम्भीरा वीरपानमिव कर्तुं नाभिकात्रिकोणकुण्डतिलकच्छलात् मदनेन कामिजनपूर्णं करपत्रमिव सौभाग्यकुण्डे लसितम् ॥

दीर्घाणि वेणीसीमन्तनासिकापादयोऽङ्गुलिः ।
रोमाली पृष्ठवंशोऽङ्घ्रौ जङ्घा नलिकाः शिराः ॥ १२९ ॥
मौर्वी धनुः शरप्रासकृपाणलकुटार्गलाः ।
भाराढ्यसुशल्याऽस्त्रियष्टिसम्पानकध्वजाः ॥ १३० ॥
वंशपृष्ठमुलापट्टनालद्रुमस्कन्धमेधयः ।
स्तूपकूपपराहस्तम्भेन्द्रध्वजार्हत्सुरोध्वजाः ॥ १३१ ॥
स्वर्दण्डच्छत्रदण्डोर्मिनिर्मोकाऽध्वाऽहिनिम्नगाः ।
मृणालं हारशैलाग्रजटावल्लीद्रुमेत्तयः ॥ १३२ ॥
शुण्डी प्राजनकं पादुकापात्रकचा भ्रमः ।
हस्तिहस्तपदौ पुच्छं माहीश्यङ्गलवीलकाः ॥ १३३ ॥
दामशैलवशलानि करभो नकुलस्तथा ।
कलुर्दैर्घ्यसकूष्माण्डमृदङ्गा पायुमण्डलम् ॥ १३४ ॥
वर्तनं लेखनी काष्ठकरणं मल्लभेदनी ।
वेत्रवीरल्लमञ्जर्यो नाराचार्केन्दुरश्मयः ॥ १३५ ॥

एतेऽस्येऽर्थोत्स्वादि । अन्यां वेणी तस्या उपमानं सर्पः सोऽपि स्तनकुण्डे भवति, तत्स्मिन्नेत्राञ्जनकरस्तनकुचमाधुर्यमौवनवाक्यधाकुण्डस्य वदनस्य रक्षाभुजङ्ग इव वेणी-दण्डः । अथवा यौवनयज्वना सुवर्णहृदयकुण्डे सदा दीपितस्य मदनानलस्य निर्गता धूमोर्मिरिव वेणीवल्लरी ।

अन्यां रोमाली तस्या उपमानं मृणालं ततः शिवसमारम्भभयुषः स्मरस्य कृते यौवनेन नाभिरोमावलीव्याजात् सज्जीकृतो मृणालधनुर्दण्डः ।

अन्यां कृपाणलेखा तस्या उपमानं यमुना ततस्तदभिहतरणसंमुखनृपतिनिकरैर्निरन्तरं विध्यमानो मम पिता रविर्विधुरत्वं गतः, ततः कियन्तमपि कालं विलम्बस्वेति विज्ञापनायेव कृपाणच्छलात् यमुना नृपहस्तं गता ॥

चक्राण्यलकभालभ्रूमध्याङ्काऽङ्घ्रिललाटिकाः ।
कटाक्षेन्द्रधनुर्विपुद्दर्धचन्द्रहलाङ्कुशाः ॥ १३६ ॥

कुञ्चिमिश्राङ्गुलीतल्पदाम्भकन्दुकदण्डका ।
तडागपालिकुद्दालतोरणानि सुधासमम् ॥ १३७ ॥
गोपानसी रथो वंशाः शाकच्छदकखेटके ।
चन्दनमालाथालेन्दुकिंशुकेमाङ्गुलीरदाः ॥ १३८ ॥
श्वपुच्छाऽश्वमुखे शृङ्गचञ्चूवृश्चिककण्टकाः ।
करिदंष्ट्रा मयुग्रीवा सिंहकुक्कुटयोर्नखाः ॥ १३९ ॥
केसरश्चन्द्रको लग्नकङ्कणं फणभृत्फणाः ।
पुरोधःकरकौपीने केकिकुक्कुटमञ्जरी ॥ १४० ॥

एवमन्येऽपीत्यादि । यथा-वर्ण्यो बालेन्दुस्तस्योपमानं दात्रं दात्रेण लवनक्रिया क्रियते, ततो मानिनीमनोभूमिप्ररूढदृढमूलमानलतावितानलवनाय मनोभुवा प्रगुणीकृतं लवित्रमिव बालशशी ।

वर्ण्याः किंशुकास्तेषामुपमानं कर्तर्यस्ता हि व्याधस्य भवन्ति, ततो मदनव्याधस्य प्रतिकामिनीजनमनोमृगवधादिव रुधिरार्द्राः कर्तर्य इव किंशुकाः ।

वर्ण्या नखाङ्कास्तेषामुपमानं किंशुकानि, ततः कुसुमास्त्रस्य कामिनीवक्षःस्पर्धिचन्द्रबाणाकृतिकिंशुककुसुमश्रेणीव पतितानि नखक्षतानि ।

वर्ण्यौ भ्रुवौ तयोरुपमानं मित्राङ्गुल्यौ, ततो बालायाः कामयौवनाभ्यां परस्परमैत्र्याय वक्रीकृतौ मित्राङ्गुल्याविव भ्रुवौ ॥

उच्चभद्रासनं धर्मप्रासादाट्टालकालयाः ।
सतां मनोरथा हस्तिहस्तिशालशिलोच्चयाः ॥ १४१ ॥

एतेऽन्येऽपीत्यादि । यथा—वर्ण्यः प्रासादस्तस्योपमानं हिमाद्रिस्ततः प्रासादे हिमाद्रौ गङ्गेव पताका ।

वर्ण्यं भद्रासनं तस्योपमानमुदयाद्रिस्ततो भद्रासनोदयाद्रौ राजा रविरिव ॥

इति श्रीजिन० अर्थसिद्धिप्रताने चतुर्थे आकारस्तबकस्तृतीयः ॥

---

अथ क्रियाभ्योऽर्थोत्पत्तिः कथ्यते । यथा—

इष्टप्राप्त्यै रिपूच्छित्त्यै स्पर्धया पूर्वजक्रमात् ।
वर्ण्यवस्तुक्रियाभावैः क्वापि श्लेषकृतस्मितैः ॥ १४२ ॥

तावद्वर्ण्यवस्तुनोऽवश्यमेव क्वापि चलनावस्थानजल्पनादिक्रिया भवति, ततस्तस्याः क्रियाया इष्टप्राप्तिः, रिपूच्छित्तिः, स्पर्धा, पूर्वजक्रम—एतानि चत्वारि कारणानि क्वापि श्लेषकृते प्रकाशानि यथौचित्यं योजनीयानि ।

इष्टप्राप्तिर्यथा—वर्ण्यो वह्निस्तस्योर्ध्ववर्धनं क्रिया तस्याः कारणं मनोगतप्रास्थानेन पारापतनमिदं तत्प्राप्तिस्ततः परमात्मस्पर्शमयं माणिक्यमयनेतुमिव वह्नो नभोमण्डलान्तर्ध्वमुर्ध्वं वर्धते स्म—

वर्ण्यं कमलं तस्य जम्भामादि ततःक्रिया तस्याः कारणं कामिनीमुखौपम्येर-

प्राप्तिस्ततः कमठं कामिनीमुखौपम्यप्राप्त्यै जलान्तराकण्ठमग्नं तपः कुरुते ।

वर्ण्यश्चन्द्रस्तस्य शिवशिरःस्मरसिंहारे निवासः क्रिया तस्याः कारणं कामिनीमुखौपम्येष्टप्राप्तिस्ततः सुमुखीमुखौपम्यप्राप्त्यै स्थाणोः शिरसि स्थायी स्मरसिंहारे तपस्वी तपःक्षामो निवसति चन्द्रः ।

वर्ण्यं यशस्तस्य स्वर्गगमनं क्रिया तस्याः कारणं निजमित्रैरावतादिमिलनेष्टप्राप्तिस्ततो निजमित्रैरावतोच्चैःश्रवोमहाहंसशिवशिरोगङ्गाविष्णुराजहंसादीनां मिलनायेव नृपयशः स्वर्गं जगाम ।

रिपूच्छित्तिर्यथा—वर्ण्योऽत्र प्रस्तस्य नभोगमनं क्रिया तस्याः कारणं स्वस्पर्धिमेरुनगाधिनरविरिपूच्छित्तिस्ततः स्वस्पर्धिमेरोराश्रयजन्तोर्रविमिव भूमौ पातयितुं यशो नभोगमनं करोति ।

वर्ण्या हंसास्तेषां सरःश्रयणं क्रिया ततो निजगतिस्पर्धिनारीवदनमित्राणि कमलानीव छेत्तुं सरः श्रयन्ति हंसाः ।

वर्ण्यो रविस्तस्योदयः क्रिया ततो निजस्वाधिभास्वदरविपुलपर्णोदराणीव तमांसि छेत्तुं रविरुदयं करोति ।

अथ स्पर्धा—वर्ण्यो यशस्तस्य नभोगमनं क्रिया तस्याः कारणं स्पर्धा ततो विन्ध्यगिरिस्पर्धया तद्गिरिरोधं कर्तुमना इव यशो व्याप्नोति ।

वर्ण्यं यशस्तस्य दिग्व्यापनं क्रिया तस्याः कारणं स्पर्धा ततो निजप्रभावस्पर्धिसुधादीधितिस्पर्धयेव नृपयशो दिक्चक्रमाक्रामति ।

अथ पूर्वजक्रमः—वर्ण्यो यशस्तस्य पूर्वजो गिरिस्ततो निजपूर्वजगिरिक्रमेणेव यशो ऽपि नभो रुरोध ।

वर्ण्या नारीमुखनवशर्करिकस्तूरिका तस्याः पूर्वजो मृगस्ततोऽस्मत्पूर्वजमृगमङ्कस्थित इति पूर्वजक्रमान्मृगमाभिरपि चन्द्रसोदरं सुमुखीमुखं श्रिता ।

एवं वस्तुषु क्रियामारोप्येष्टप्राप्त्यादिकारणानि योजनीयानि ॥

क्रियाम्योऽर्थान्तरोत्पत्तये प्रकारान्तरमाह—

वर्ण्येऽपह्नुतिवाचकशब्दैरारोपितेषु तुल्येषु ।
रचितोचितक्रियाणामिष्टप्राप्त्यादि कारणं कल्प्यम् ॥ १४३ ॥

वर्ण्यवस्तुन्यपह्नुतिवाचकैः शब्दै रूपकोत्प्रेक्षाभ्यां वर्ण्याकारक्रियादिभिः सदृशानि वस्तूनि यथोचितं क्रियाः कल्पयेत् । ततः प्रकल्पितक्रियाणामिष्टप्राप्त्यादीनि कारणानि योजयेत् । यथा—वर्ण्या नारीमस्तास्तेषु तुल्यत्वादारोपितास्तारास्तासां पादलग्नं क्रिया तस्याः कारणं नारीप्रसादनेष्टप्राप्तिः, तनमुख मुखस्पर्धापातवेनास्मत्पतिः कलङ्कितः क्षयी मासप्रभृति स्पर्धत इति नार्याः प्रसादं कर्तुमिव नखमिषेण चन्द्रदारास्ताराः पादयोर्लग्नाः ।

वर्ण्यश्चन्द्रस्तत्तुल्यत्वादारोपितं यशस्तस्य त्रिभुवने भ्रमणं क्रिया तस्याः स्वसमाननिरीक्षणं कारणं ततो मत्समानः कोऽप्यस्ति न वेति निरीक्षितुमिव पीयूषरुचिच्छलेन नृपयशो भुवनत्रयं भ्रमति ।

वर्ण्या वेणी तस्यां तुल्यत्वादारोपितः सर्पस्तस्य नार्या अनुसरणं क्रिया ततस्तद्वदनस्य सुधया सह मैत्रीमिव कारयितुं सुधाव्यसनः सर्पो वेणीमिषेण नार्या अनुसरणं करोति । अथवा तस्याः कटाक्षवक्रत्वमिव शिक्षयितुं वेणीमिषेण सर्पो नार्या अनुसरणं गतः ।

वर्ण्या दशनद्युतिस्तस्यामारोपिता सुधा तस्या रामाश्रयणं क्रिया ततो वक्त्रमाधुर्यमिव शिक्षितुं दशनद्युतिमिषेणाश्रयणं करोति ।

रिपुच्छिदुक्तिर्यथा—वर्ण्यं पेशलवचस्तत्रारोपितं यशस्तस्य स्वर्गगङ्गाश्रयणं क्रिया तस्या रिपुच्छित्तिः कारणं ततः स्वस्पर्धिनीं स्वर्गङ्गामिव गाहितुमेतावचश्छलेन नृपयशः स्वर्गङ्गां गतम् ।

वर्ण्यौ कुचौ तयोरारोपितौ चक्रौ तयोः कान्ताश्रयणं क्रिया तस्याः कारणं रिपुच्छित्तिः ततो निजवैरिणश्चन्द्रस्य तन्मुखत्वाच्चात् पराभवं कारयितुं कुचच्छलेन चक्रौ नारीमाश्रितौ ।

अथ स्पर्धा—वर्ण्या हारमुक्तास्तास्वारोपितास्तारास्तासां नारीसमाश्रयणं क्रिया तस्याः कारणं स्पर्धा ततोऽस्मत्सहोदयेन समसा वेणीमिषादियमाश्रितेति स्पर्धया हारमुक्ताच्छलेन ताराभिः स्त्री समाश्रिता ।

वर्ण्यो निजशिरोमणिस्तस्यामारोपिता कीर्तिस्तस्याः शिराश्रयणं क्रिया तस्याः स्पर्धा तत्र, चन्द्रविच्छेदेनः मदरिपुकीर्तिः शिरमाश्रितेति स्पर्धयैव तत्र कीर्तिः शिरोमणिच्छलेन शिरे श्रिता ।

अथ पूर्वक्रमो यथा—वर्ण्यौ वैरिकरिशिरःकुम्भस्तत्रारोपितो नृपतापस्तस्य वैरिकरिकुम्भप्रवेशः क्रिया तस्याः कारणं पूर्वक्रमस्ततोऽस्मत्पूर्वजः कृशानुर्वैरिकुम्भेषु प्रविष्ट इति कृशानोस्तनयो नृपप्रतापोऽपि सिन्दूरच्छलेन वैरिकरिकुम्भेषु प्रविष्टः ।

वर्ण्यो वैरिकरिदन्तावलिस्तत्रारोपितं नृपयशस्तस्य क्रिया वैरिकरिकुम्भाश्रयणं तस्याः कारणं पूर्वक्रमस्ततोऽस्मत्पूर्वक्रमस्ततो अस्मत्पूर्वजः । कृशानो रिपुकरिमकुम्भे निष्क्रान्तेति कृशानोस्तनयं नृपयशोऽपि रिपुकरिकुम्भयोरेषु वैरिकरिकुम्भेषु पाण्डिमच्छलेन निष्क्रान्तः ॥

आरोप्य यदृष्टवस्तूनां क्रियास्तु सदृशीः क्रियाः ।
तासां कौशिकक्रियाणां कदाप्यनुत्पत्तिकारणम् ॥ १५४ ॥

आरोप्यवस्तूनां क्रियासु कस्यमादिषु मर्मादिषु, समासृष्टादिषु वस्तुतया कस्यापर्यन्तादिकाः क्रिया आरोपयेत् । ततस्तासामारोपितक्रियाणां कर्मादीनां हेतूंश्च, स्वाभाविकं चैव प्रत्ययाद्यपि कारणानि कल्पयेदपि ॥

इति श्रीजिन० अर्थसिद्धिप्रताने चतुर्थो क्रियास्तबकस्तुर्यः ॥

यथाधारपरिवारादिभ्योऽर्थोत्पत्तिर्यथा—

घनगिरिजलमध्यच्छायशीतानिलोद्य-
प्रहरणपरघट्टाभ्येतजन्तुपकारैः ।
सरिदधिगममौनध्यानतैश्चल्यमन्त्रा-
मयनमखिलमागायाचितशान्तितप्तैः ॥ १४५ ॥

वर्ण्यवस्तुना निर्जितस्य सदृशस्य वस्तुनो घनादिभिराधाराभिर्मादैरर्थः समर्थनीयः । यथा—श्रोत्रनेत्रजिता मृगा वनं गताः । मध्यजितः सिंहो गिरिगह्वरं प्रविष्टः । मुखजितं कमलं जलदुर्गमगात् । स्थैर्यजिता गिरयो भास्वत्तापवातशीतादिदुःखानि सहन्ते । भ्रमरः सेवां तितिक्षते । आस्येतरमादीनां धारासम्पातैरप्युपकारं कुरुते । गतिजिता हंसाः शरदधिगमं कुर्वते । दम्भजितो बकः सरित्तटे मौनो ध्यानं कुरुते । गुरुत्वजितो मेरुर्लोकाऽऽदेश्च स्थाने निश्चलोऽभूत् । मुखजितं कमलं भ्रमरारवैर्मन्त्रान् जपति । नखजितानि रत्नानि गिरौ निराहाराणि तस्थुः । अधरजितानि प्रवालानि जलमध्ये अनाहारतया वर्तन्ते । अङ्गसौकुमार्यजितं शिरीषकुसुमं वनेऽयाचितवृत्तिं कुरुते । मुखजितं कमलं भ्रमराद्युपघातैरपि क्षमां कुरुते । इत्युदाहरणानि । वर्ण्येन जितपदार्थस्येत्यादिभिरुपायैरर्थः समर्थनीयः ॥

लज्जाकोपभयानाशसेवादम्भास्यकृत्स्नताः ।
दुःखात्पाण्डुरता शस्त्रीविपक्षकम्पादियाजने ॥ १४६ ॥

वर्ण्यजितस्य वस्तुनः पराभवोद्भवा एते लज्जादयो भावा यथोचितं योजनीयाः । यथा—मुखजितं पद्मं लज्जयेव वनं गतम् । कोपतप्तमिव कमलावर्तं धत्ते । भयान्मालकण्ठमद्रं अनाहारतया तपस्तनुते । अथवा जलदुर्गमगात् शम्भोः कण्ठमूले वा सेवां करोति । भ्रमरावैराक्रन्दं कुरुते । नीलकण्ठिमि कमलमनुरक्तं धत्त । नेत्रजितं कैरवं दुःखात् पाण्डुरतां गतम् । भ्रूभङ्गमिव भङ्गुरं शाखां क्षिपति । अन्योन्यमन्यो हरौ । भृङ्गमिवाद्रा विषं मक्षयति । एवं यो रक्तपदार्थः स सदृशेन जितः कोपादिव रक्तोऽभवत् । कथाचित्तुल्यया सानुरागो भगवान् । यः श्वेतः श्वासमलसदृशजितो दुःखादिवोत्पाण्डुरः कृष्णश्च समर्थनीयः ॥

पुष्पाङ्कुरादिमवस्तूनां धनाद्यैः सत्पदादिकम् ।

किञ्चिद्वस्तु पुष्पाङ्कुरादिमयं किञ्चिद्वस्तुमयं किञ्चिदनुमयं किञ्चित्पाषाणमयं किञ्चित्कर्ममयं किञ्चित्कार्यमयमित्यादिवस्तूनां धनधान्यादिदिनराशिभिः पुण्यस्थाना अवश्यभावकारणभक्तिमाधुर्यपरिवारादीनां प्राप्तिः सम्भाव्या ।

यद् पुष्पाङ्कुरादिमयं वस्तु तस्मिन्ते भावा विभाव्याः । यत्पूर्वं पुष्पमये रविवासपर्वपातमातादिकस्मवाचितमतादिभिस्तपस्तप्तं तन्मूलश्रवकरफुरणकरकम्पादिभिः सुरोपलताना रोगार्तानां भोगादिना मधुकारिणां मत्स्यानां मृगाणां पक्षिणां चतुष्पदाना सुकृतं तेन पुष्पाङ्कुरमयवस्तुनः पुण्यस्थानादिप्राप्तिः ।

पुण्यमये वस्तुन्येते भावाः समारोप्याः । यत्पूर्वं पुष्पाख्यातपारधरादवरकस्य प्रदेशापकारादस्थानमयमरणायविविधकाकाह्वानकबोधरविप्रायोपवस्ति समर्पितामाशा-

र्थं शिरःप्रहारादिभिः कष्टमनुभूतं, यत्र जनतुभुक्षाकृष्णाहाराप्रजन्माधारतया लोकोपकारः कृतस्तैः सुकृतैर्मृन्मयवस्तुनो भव्याधारादिकमाख्येयम् ।

धातुमये वस्तुन्येते भावा भावनीयाः । यत्पूर्वं वह्निप्रवेशहस्तपुटघातमन्दशायन-यन्त्रास्तारकर्षणताडनच्छेदनघनप्रहारटङ्किकाघातादि कष्टमनुभूतं, यत्र देवादिमण्डनतया कान्ताभूषणतया लोकानां पात्रभोजनोपकरणाधारतया देवदेव्यादिपात्राधारतया लोकोपकारः कृतस्तैः सुकृतैर्धातुमयादिवस्तुनः शुभस्थानादि सम्भाव्यम् ।

पाषाणमये वस्तुन्येते भावा भाव्याः । यत्पूर्वं टङ्कविदारणघनप्रहारटङ्किकाघातादि कष्टमनुभूतं, धर्मस्थाने देवतादिरूपतया परोपकारः कृतस्तैः सुकृतैः पाषाणमयवस्तुनः शुभस्थानादि सम्भाव्यम् ।

काष्ठमये वस्तुन्येते भावा भावनीयाः । यत्पूर्वं कर्तिकाच्छेदनशस्त्रभेदविक्रयधर्म-कालादागमनादिभिः काष्ठच्छेदसूचिकाभेदकरपत्रकवधस्त्रप्रहारादि कष्टमनुभूतं, यत्राङ्गनातया, भाजनाद्युपयोगिकपट्टिकादिकतया, पुस्तकाधारगतया इत्यादिभिः परोपकारः कृतस्तैः सुकृतैः काष्ठमयवस्तुनः शुभस्थानाद्यूह्यम् ।

कार्पासमयसूत्रमये वस्तुन्येते भावा भाव्याः । यत्पूर्वं लोतवाताद्यवाधितावस्थान-कर्षणच्छेदविक्रयादिबन्धनतोलनकर्तनसूत्रारोहणाद्य-[illegible]-विग्रहणकर्षणताडनप्रहारविनिर्मितादि कष्टमनुभूतं, सूचिकादिकतया वस्त्रेण परगुह्याच्छादनदेवतादिपरिधानादितया लोकोपकारः कृतस्तैः सुकृतैः कार्पासमयवस्तुनो भव्यस्थानादि सम्भाव्यम् ।

एवं वस्त्वन्तराण्यपि [illegible] भव्यस्थानाद्यवाप्तिभिर्धीः सम्भाव्या ॥

छिन्नस्य सेवा कथना स्तुताः प्रतिबिम्बता ॥ १४३ ॥

छिन्नस्य द्वौ प्रकारौ भवतः—शिरश्छिन्नं, [illegible] वा । शिरश्छिन्नं [illegible] । यथा [illegible] । [illegible] यथा—[illegible] [illegible] ।

[illegible] यथा—[illegible] । [illegible]

[illegible] यथा—[illegible] । [illegible] । इत्यादूह्यम् ।

[illegible] ।

यथा—[illegible]

[illegible]

[illegible]

कमलं स्पर्धोद्भवात् राजप्रसादविकलं सकण्टकं च जातम् । यशःस्पर्धी चन्द्रः सकलङ्कः क्षयी च जातः ।

पक्षेऽपि सदोषता । वर्ण्यवस्तुनः स्पर्धातिरेकेण सदृशं वस्तु यद्दूतं कुर्वाणमपि सदूषणं स्यात् । यथा—मुखस्पर्धां कुर्वन् चन्द्रो महेश्वरं सेवमानोऽपि सकलङ्कोऽभूत् । मुखस्पर्धोद्भवैः पापैः कमलं ईशद्विजात् कतिरष्करैरपि प्रीतान् कुर्वाणं सकण्टकं भवति ॥

अथ तपसाऽर्थोत्पत्तिभेदाः—

स्वगतस्तपः स्वगतं छायागतं च प्रतिबिम्बगतम् ॥ १५८ ॥

तपोविधिस्त्रिधा आत्मनैव स्वयं कृतं, सदृशवस्तुच्छायया वा कृतं, जलादिषु प्रतिबिम्बतया वा कृतम् । त्रिविधमप्युदाहृत्यते ।

यदर्थादिभिस्तपो यदर्थं जितस्यैतत्कलाप्तये ।

वर्ण्यं जितस्य वस्तुनो वर्ण्यशोभाप्राप्तये वर्ण्यजयाय वा यमादिभिस्तपः कल्पनीयम् । स्वगतं यथा—मुखजितं कमलं तच्छोभाप्राप्तये जलवासादि तपः कुरुते ।

छायागतं यथा—मुखशोभाप्राप्तये चन्द्रो वने कुशासनावलम्बी कुसुमस्तबकच्छलेन तपस्तनुते ।

प्रतिबिम्बगतं यथा—मुखलक्ष्मीलब्धये चन्द्रो स्वमूर्तिप्रतिबिम्बतया लोकशिरसि तपस्तनुते ।

एवं सर्वभेदेषु त्रिविधत्वं बोध्यम् ॥

तपसा तत्पदप्राप्तिः

जितस्य सदृशस्य तपसा वर्ण्यशोभाप्राप्तिः । यथा—सरकमलेनाकण्ठजले जलाहारेण तपस्तप्तं तेन नारीमुखपद्मता लब्धा । यच्चन्द्रेण वने कुसुमस्तबकच्छलेन तपस्तप्तं तेन स्त्रीमुखलक्ष्मीर्लब्धा । यद् भृङ्गश्रेणिभिर्विष्णुपदाम्बुजे कान्तिधोरणीमिषेण सेवा कृता तेन नारीकटाक्षच्छटोपमा प्राप्ता ॥

दुःखादिस्तदप्राप्तिकः ॥ १५९ ॥

तपसाऽपि वर्ण्यलक्ष्म्या अप्राप्तौ जितं वस्तु दुःखचेष्टितानि कुरुते । यथा—मुखजितं कमलं जलवासादिभिरपि मुखलक्ष्मीं न प्राप ततो भ्रमरारावैराक्रन्दं कुरुते । वेणीजिता भृङ्गश्रेणी वने मकरन्दास्वादमाधायापि वेणीसाम्यं न प्राप ततः साक्रन्दा भ्रमति ॥

तेनापि न हि तत्प्राप्तिः

तपसाऽपि वर्ण्यशोभां जितं वस्तु न लभते । यथा—कमलं अंशे आकण्ठमग्नं तपस्तेपे परं नारीवक्त्रोपमां न प्राप । इतः सरस्वतीपदसेवी चक्रे परं नारीमुखोपमां न प्राप ॥

महत्प्राप्तिर्न तस्य तु ।

तपसा महतोऽन्यस्य श्रेयसः प्राप्तिर्भवति न पुनर्वर्ण्यशोभाप्राप्तिः । यथा—कमलं जलवासादिभिः श्रीपदं राजहंससेव्यं जातं, न पुनः स्त्रीमुखोपमां लेभे । चन्द्रेण ज्योत्स्नाद्यानैश्चकोरप्रीणनाद्यकृत्यैः शिवशिरसि पदं लब्धं न पुनः स्त्रीमुखोपमानम् ॥

तद्वाप्तौ दुष्कृतं विघ्नः

तपसा वर्ण्यलक्ष्मप्राप्तौ जितवस्तुनः किञ्चिद्दुष्कृतं विघ्नः कल्पनीयम् । यथा— कमलं शम्भोरम्भोमूर्तेः सेवया मुखोपमामयास्यच्चेन्नित्याश्रितभृङ्गबन्धनं नाकरिष्यत् । विष्णुपदसेवासुकृतेन विष्णुपदी तत्कीर्तितुलनां प्राप्नुयाद्यदि नीचगमनं न कुर्यात् ॥

तद्वाप्तावपरं शुभम् ॥ १५० ॥

तपसा वर्ण्यशोभाप्राप्तौ सदृशवस्तुनोऽन्यदपि श्रेयः सम्भाव्यम् । यथा—कमलं जलवासादिभिर्मुखोपमां प्राप्य लक्ष्मीस्थानं राजहंससेव्यं च बभूव । जलवासादिभिः पाञ्चजन्यो नारीकण्ठोपमानं प्राप्य लक्ष्मीपतेरपि करारविन्दानुग्राह्यो बभूव ॥

श्रेयस्तद्वाप्तौ दोषेऽपि

तपसा वर्ण्यस्योपमाप्राप्तौ सदृशवस्तुनः सदोषस्यापि श्रेयः कल्पनीयम् । यथा— जलवासादिभिर्मुखोपमां प्राप्तं कमलं सकण्टकमपि देवशिरांस्यधिरोहति । विष्णुपद-सेवया गङ्गा यत्कीर्तिसमतां प्राप्य नीचगामिन्यपि शिवशिरःसंश्रयाऽऽसीत् ॥

तद्वाप्तौ नर्तनादिकम् ।

तपसा वर्ण्योपमाप्राप्तौ हर्षेण सदृशवस्तुनो नर्तनादीनि कल्पनीयानि । अमूनि यथा—

नृत्योत्कन्धकरता स्मेरगौरवापीडपुष्टता ॥ १५१ ॥
आश्रितातिथिविप्रादिदानं देवादिपूजनम् ।

यथा—जलवासादिना त्वन्मुखोपमां प्राप्य कमलं वातचलितपत्रैर्नृत्यं रचयति । राज्ञः स्थैर्योपमां प्राप्य मेरुरुत्कन्धरोऽभूत् । गाम्भीर्योपमां प्राप्य जलधिः सर्वदिग्व्यापी बभूव । मतिसमतां प्राप्य बृहस्पतिर्देवगुरुतां गतः । त्वत्केशोपमां प्राप्य कलापी शिखाकलापादापीडं धत्ते । स्थैर्योपमां प्राप्य गिरिः शिरःस्थमेघावलिव्याजान्मुकुटं धत्ते । राज्ञः स्थैर्योपमां प्राप्य मेरुः स्थूलोऽभूत् । मुखशोभां प्राप्य चन्द्रः स्वाश्रित-चकोरान् स्वेच्छया ज्योत्स्नापानं कारयति । मुखलक्ष्मीं लब्ध्वा कमलं हंसद्विजाना-तिथीन् मृणालाहारदानैः प्रीणयति । मुखोपमां प्राप्य चन्द्रेण स्वकलया शिवपूजा कृता । एवं चक्रे नृत्यम्, उच्चे गर्वात्कन्धरता, विस्तारे स्मेरता, पूज्ये गौरव, शिरःस्थवस्तु-न्यापीडः, स्थूले पुष्टता कल्पनीया । इत्याद्यनेकोत्कर्षार्थः कल्पनीयः ॥

अर्थोत्पत्तौ प्रकारान्तरमाह—

द्वैध्यस्याङ्गसुहृद्भ्रमैः

वर्ण्यवस्तुना विना यः पदार्थस्तस्य वर्ण्यं तावद् द्वैध्यम् । ततो द्वैध्यस्य वर्ण्यस्य वाऽङ्गानि तेषां साम्येन सुहृद्भ्रमेण यानि वस्तूनि तेषां क्रियाभ्रमाः कल्पनीयाः । यथा—नार्याः कुचाभ्यां जितः कुम्भी नारीमुखमित्राणि कमलान्युन्मूलयति । नार्या मध्यजितः सिंहो नारीनेत्रमित्राणि मृगकुलानि भिनत्ति ॥

अङ्गविद्वेषिणो वर्णः ॥ १५२ ॥

द्वैध्यस्याङ्गानां समतया द्वैधिकानि यानि वस्तूनि तेषां विरुद्धार्थवर्णोत्पादनं कार्यम् । यथा—राज्ञः प्रतापजितो रविः राजयशोमित्रचन्द्रबिम्ब

हस्ते । राजा यशोजितचन्द्रो राजप्रतापमित्रविद्वेषिणः कैरवाणि विकासयति ॥

अङ्गद्वेषिसुहृत्पोषैः

द्वेष्याङ्गद्वेषिणो ये तद्द्वन्द्वेषां जितपदार्थपार्श्वात् पोषो विधेयः । यथा—नार्या मुखजितचन्द्रः कोकशोकद्वेषिपद्मभेदिनीनिद्राणानि कैरवाणि विकासयति । नार्या गतिजितो हस्ती मुखद्वेषिकमलोपासकान् भृङ्गान् दानेन पुष्णाति ॥

अङ्गद्वेषिद्विषद्वधैः ।

द्वेष्याङ्गद्वेषिणां यानि द्विषद्रूपाणि वस्तूनि तेषां जितपदार्थपार्श्वाद्वधो विधातव्यः । यथा—नार्या धम्मिल्लजितो राहुः श्रीमुखद्वेषिकमलद्वेषिणं, नारीकुचपुरमद्वेषिणं वा चन्द्रं पीडयति । नार्या वेणीजिता भृङ्गश्रेणी श्रीमुखचन्द्रद्वेषिकमलानि पराणि चारयति ॥

समानवस्तुनः शोभाचौर्यात्प्रकोपोऽस्य निग्रहः ॥ १५३ ॥

वर्ण्योपमानो वस्तु तस्य वर्ण्याङ्गशोभाचौर्ये परिकल्प्य कोपादिषु नाशो निग्रहो वा कल्पनीयः । यथा—मृगा नारीनयनशोभां हृत्वा वने नष्टाः । श्रीमध्यश्रियं हृत्वा सिंहो गिरिगह्वरे गतः । नारीमुखकमलशोभां कमलमिति राजहंसैः क्षतः क्षिप्ते । राहौ श्रीमुखलक्ष्मीं हरति चन्द्र इति प्राप्त कालेन शिरच्छेदः क्रियते ॥

*निपातादतनद्रव्यमङ्गस्वेदक्षमङ्गुलैः ।*

राजवेषासमव्याप्तविदग्धादिनिषेवणैः ॥ १५४ ॥

अगाधयगमनापेयपानवाभक्ष्यभक्षणैः ।

अपहृत्वाङ्गच्छेदित्वं प्रायश्चित्तमतद्दयनः ॥ १५५ ॥

दिव्यं यथा—

हत्वाऽपि कान्तिवनमत्र वनप्रवेश कीर्तिदिव्यं मृगक्षिप जगत्यपवादभीतः ।

इन्दु यथाद्युति पशुशवर्णानामर्पित लग्नमिषवर्दशुनो न शुद्ध ॥

प्रायश्चित्तकरणं यथा—

सरो बारवार पीत्वा मातङ्गकुम्भयोऽतम्

अनुतापेन गलति दिङ्मुखानां यश अस्यम् ॥

अथ भ्रमप्रकारैर्योत्पनिर्दंशा—

स्वस्थानादिभिर्भ्रमात् वायप्रवृत्ति परिवर्त्यन

[illegible] पूर्वेण समानयन्—

कलिकानि गामसुभानानि न विन्दति च न विधुरं गाढं

इति देवर्षि मन्वन्तेन गुरुत्वाग्रहः प्रमाणस्मारकम् ।

तारकाग्मुखमुक्तानिकरजनकानानि

निखर्गतथाप्यैव चेतं वस्तुमान्यमपुष्पम् ॥

तत्र वेदपदेषु गुणितेषु कलामग्न

प्रतिवर्त्येव नलिनी वर्तमाना स्थिताम् ॥

भ्रमवादिनोऽपि प्रतिबिम्बता यथा—

मणिनद्धेषु यस्मौधाङ्गणेषु प्रतिबिम्बितम् ।
शशाङ्कं कैरवभ्रान्त्या भजन्ते भृङ्गराजयः ॥

**कार्यप्रवृत्तिरन्यत्र कारणप्रत्यये भ्रमात् ॥ १५६ ॥**

यथा—

एकत्र क्वचिदेव देवसदने सम्प्रेक्ष्य साक्षात्कृत—
प्रद्योतं सपनीयकुम्भमुदयत्साम्भूतार्कभ्रमात् ।
साश्लिष्यन्त्यनिशं निशास्वपि वियद्गङ्गारथाङ्ग्यो मिथ-
द्दर्शभ्रान्तिभृतः पयोगतनिजच्छायाविमुग्धाशयाः ॥

**कार्यप्रवृत्तौ भ्रमतः साफल्यं जायते क्वचित् ।**

यथा—

विधुमणिमयसौधप्राङ्गणे यत्र चन्द्रप्रतिमितिमतिपुष्पैः कैरवभ्रान्तिभाजः ।
असकृदमृतबिन्दुस्यन्दपानेन भृङ्गाः प्रसृमरमकरन्दास्वादसौख्यं लभन्ते ॥
यत्रोन्मुखं चातकवृन्दमभ्रभ्रमेण चैत्योत्थितधूपधूमे ।
वेलत्पताकाग्रगृहीतमुक्तनभोनदीबिन्दुभिरेति तृप्तिम् ॥

**भ्रमात् कार्यस्य नैष्फल्ये भ्रमः सत्येऽपि वस्तुनि ॥१५७॥**

यथा—

मालिन्योघैः शरगृहशिरःशातकौम्भीयकुम्भान्
अर्कभ्रान्त्या निशि विफलिताः स्वर्गगङ्गारथाङ्ग्यः ।
अर्कालोकादुपगतमपि प्रीतिभाजं रथाङ्गं
मिथ्या मुदा सपदि न परीरम्भुमारात् त्वरन्ते ॥

**भ्रमात् कार्यस्य नैष्फल्ये सत्यप्यकरणं तथा ।**

यस्मिंश्चित्रगतप्रसन्नशिखरश्रोत्स्करेण वेश्मान्तरे
मार्जारः परिवर्जितोऽपि जवादाहृत्य सत्यभ्रमात् ।
तान् विस्रब्धमिवागतोऽपि स पुनः प्राग्भ्रमभावादमि—
व्यक्तं मुग्धविरोधबोधविषयो लोकैः समालोक्यते ॥

**भ्रान्तस्य वस्तुनोऽन्यत्वं जायते भ्रमतोऽन्यतः ॥ १५८ ॥**

यथा—

चित्रमयाः कृत्रिमतन्त्रिरन्ध्रः कपोतपालीषु निकेतनानाम् ।
मार्जारमध्यासनविभ्रमाढ्यं यस्यां जनः कृत्रिममेव मेने ॥

**भ्रमज्ञानपदार्थस्य पूरणं च भ्रमान्तरात् ।**

यथा—

संक्रान्तं प्रतिबिम्बमम्बरमणेः सुधाधवलेऽङ्गणे
यत्र प्रासरवस्त्रपूर्णकलशभ्रान्तिं क्रियते तथा ।
कामारम्भमहोत्सवेऽरुणरजःपटलं भ्रमत्-
कुङ्कुमविशिरापिता पिहितमत्रान्ति यथा कल्पयेत् ॥

**नैष्फल्ये भ्रमतः कार्यप्रवृत्तेः क्वाऽपि निश्चयात् ॥ १५९ ॥**

यथा—

यत्र स्फुरत्स्फटिकमण्डपगुहागृहेऽर्धसंक्रान्तबिम्बमवलोक्य निजद्विपेभीभिः ।
स्वयंप्रयासकरणोच्चरणाप्रसङ्गाच्छिन्नमिव सत्यकम्पोऽपि किल प्रवृत्तम् ॥

भ्रान्तस्यापि भ्रमो यः स्याद्विशेषोऽसौ प्रतिभ्रमः ।

निद्रान्तेषु वने द्विपः सहचरीवक्षोरुहौ वीक्ष्य च-
कुम्भेभोन्नतकुम्भविभ्रममथाहर्तुं रहं तेनिरे ।
तांश्च प्रासभिमत्तभित्तिफलितप्रतीकांश्च वेगोल्लस-
द्वेणीदण्डविलोकनेन सदृशि व्याधाश्च मूर्च्छामगुः ॥
अन्यो हस्ती स्फटिकघटिते भित्तिभागे स्वबिम्बं
दृष्ट्वा दूरात् प्रतिगज इति त्वद्द्विषां मन्दिरेषु ।
हत्वा क्रोधाकुलितदशनस्तद्गुनर्वीक्षमाणो
मन्दं मन्दं स्पृशति करिणीशङ्कया साहसाङ्कः ॥

अन्योन्यभ्रान्तिको भेदो यत्राऽन्योन्यं द्वयोर्भ्रमः ॥ ११० ॥

यथा—

आरूढा कुसुमोद्गमे नवमधुव्यापारपानोत्सवाः
कीराः पक्वफलाशया मधुकरीशिञ्जिनि घुष्यन्ति च ।
एतेषामपि जातकिंशुकदलभ्रान्त्या समाकर्षिणो
पुष्पभ्रान्तिभृतः पतन्ति सहसा चञ्चु भृङ्गाङ्गनाः ॥
आरूढाः संभ्रमैर्द्विगुणितकिलराग्यपूर्वमालोक्य भित्ति-
व्याघातात् स्वप्रतिमां दिवि जलदजनाधीन हिंसन्ति सिंहाः ।
अत्रान्तरे सोऽपि तत्र प्रतिकृतकमृगारातिनिर्व्याजकोपान्
जीवन्मतो गजेन्द्रः सचिवमपि भवन्तीव तेभ्यो बिभेति ॥

इत्याद्यनेकोल्लेखैर्भ्रमाद्युत्पत्तिः कार्या ॥

अथान्यतरनिरारोपैः

वस्तुनि तद्विदवस्तुनिरूपका विभावमात्रोत्पन्ने । यथा—

इन्दुमुखी कुमुदाक्षी रम्भोरुः कमलचारुकरचरणा ।
अमृतद्रवभावस्वाद् हृदयलता देवि ! किं दहसि ॥
[illegible] विभाति पुष्पम् ।
[illegible] ॥
कालिन्दुदराऽपि [illegible] ।
[illegible] ॥

कार्यादिप्रतिभूतिभिः ।

कार्यादुत्पत्तिक्रमेण कारणेन निवृत्तिः कल्पनीया । यथा—

धूमं भूजे योऽग्नि [illegible] ।
[illegible] ॥

उपाध्यायात् प्रभोर्मित्रात् सेवकाज्ज्ञातिमापतः ॥१६१॥
सङ्गात्सद्गुणसंक्रान्तिः

यथा—

राजन् ! राजसुतेव [illegible] निस्त्रिंशदेवाभिधा-
[illegible] ।
[illegible] वेत्ति स्म तस्मात् [illegible]
[illegible] ॥

किं त्वया [illegible] ! [illegible] ।
[illegible] प्रतिपद्यते ॥

एतेभ्योऽपि न सा क्वचित् ।

[illegible] स्यात् । यथा—

[illegible] ।
[illegible] ॥

आहार्याद्दर्शनाद्गुण्यगुणविपर्ययैः ॥ १६२ ॥

[illegible] ।

[illegible] । समासाय—

[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥

[illegible] यथा—

[illegible] ।
[illegible] ॥

[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥ १६३ ॥

[illegible] । [illegible] ।

[illegible]—

[illegible] ।
[illegible] ॥ १६४ ॥
[illegible] ।
[illegible] ॥ १६५ ॥
[illegible] ।
[illegible] ॥ १६६ ॥

महान्ति दिक्कालव्योमज्ञानेशशेषशयाः ।
आरामः सन्मनोबुद्धिसमुद्रारण्यभूमयः ॥ १६७ ॥
शय्याऽरः पुलिनं श्रोणी कपाटः सैन्यवेश्मनी ।
सूक्ष्माणि केशशून्यमनस्त्रसरेणुरजःकणाः ॥ १६८ ॥
मनः सन्मतिसंसारस्वरूपपरमाणवः ।
मङ्गल्यानि दधिदूर्वाचन्दनादानदीपिकाः ॥ १६९ ॥
रसालपिप्पलाशोकपत्राण्यम्बुजं फलम् ।
शङ्खसिद्धार्थकौ सिद्धमन्नं मध्वाज्यमामिषम् ॥ १७० ॥
रूप्यं ताम्रं मणिः स्वर्णं भूषणान्यंशुकानि च ।
व्यजनं चामरं छत्रं ध्वजो यानेभवाजिनः ॥ १७१ ॥
ताम्बूलं गीतवादित्रगुरुवन्दिद्विजाशिषः ।
शुभस्वप्नशकुने हंसचाषखञ्जनदर्शनम् ।
अङ्गनास्फारशृङ्गाररूपा प्रेमवती प्रिया ॥ १७२ ॥
श्रीवत्समत्स्यदर्पणभद्रासनवर्धमानवरकलशाः ।
स्वस्तिकनन्द्यावर्तावष्ट महामङ्गलान्याहुः ॥ १७३ ॥
अमङ्गलानि घूकाहिकपोतशशकीनयः ।
कृकलासो दुःशकुनं दुःस्वप्नं दुरुपश्रुतिः ॥ १७४ ॥
शून्यग्रामध्वजपातपतितादिविकारिणः ।
महच्छिद्रमहारोगार्तदीनमलादिधारिणः ॥ १७५ ॥
सम्मार्जनी खरोऽजाङ्घ्रिरजो धूमश्चितोद्भवः ।
छाया शाखोटकविभीतकयोर्मञ्चदीपयोः ॥ १७६ ॥
वह्निवर्णाश्रमुद्रार्हद्विष्णुमल्लार्कनायकाः ।
पावकाम्भोमदद्भूमिवेदवाणीयतिद्विजाः ॥ १७७ ॥
पुरोधा धेनुरतिथिः सुवर्णं दर्भगोमये ।
स्वयं सती चरित्राणि पूज्यपादरजःकणाः ॥ १७८ ॥
गङ्गा गोदावरी रेवा यमुना च सरस्वती ।
कामरूपः कुरुक्षेत्रान्तर्वेदी काशिपूस्तथा ।
सत्यः सीता दमयन्ती द्रौपद्यरुन्धती तथा ॥ १७९ ॥
सत्यार्थे हरिश्चन्द्रनलरामयुधिष्ठिराः ।
अपवित्राणि रजकादिवराहकुर्कुटश्वान्त्यजाः ॥ १८० ॥
रजस्वला श्मशानार्वामिस्ताम्रकाराः शवानि च ।
कृतघ्नस्वामिविश्वासघ्नादिमहापापिनः ॥ १८१ ॥
शरीरच्युतकेशापुच्छरार्द्धदिकुक्कुराः ।
वस्त्राणि प्रियाणीतनुपाध्यायादि नाटकम् ॥ १८२ ॥
आरामः कुसुमोरामारामाविभ्रमकेलयः ।

सुखशय्या शशी दोला स्वातन्त्र्यं श्रीः सुतोद्भवः ॥ १८३ ॥
नष्टाप्तिः स्वस्पृहालब्धिर्वियुक्तप्रियसङ्गमः ।
दाता विद्वान् सुहृद्विद्या स्वर्गः पीयूषमप्सराः ॥ १८४ ॥
धर्मः सद्वचनं सन्तः सन्तोषज्ञानमुक्तयः ।
दुःखदान्याधिनरकौ काराव्याधिविरोधिनः ॥ १८५ ॥
कुभार्या नैःस्व्यकुग्रामप्रवासाः कुस्वामिसेवनम् ।
कन्याबहुत्वं वृद्धत्वे पत्न्याः पुत्रस्य वा मृतिः ॥ १८६ ॥
बाल्ये मातृमरणं निवासः परवेश्मनि ।
दुर्लभे नीरसे स्नेहहीने पररते रतिः ॥ १८७ ॥
वर्षाप्रवासौ द्वे पत्न्यौ कुभृत्योऽर्घहलः कृषिः ।
कलङ्को निष्कलङ्कस्य मानिनीमानखण्डना ॥ १८८ ॥
स्थिराणि पृथिवी शैलो धर्माधर्मौ सतां मनः ।
सती शैलं रणे धीरः प्रतिपन्नं महात्मनाम् ॥ १८९ ॥
अस्थिराणि नदीपूरलहरीबिन्दुबुद्बुदाः ।
विद्युद्धूमस्फुलिङ्गोल्कानला दीपोऽनिलाहतः ॥ १९० ॥
मत्स्यः कपिध्वजौ सन्ध्या हस्तिपुच्छकरश्रुतिः ।
कन्दुकभ्रामरावक्रं दोलास्त्रीविभ्रमश्रियः ॥ १९१ ॥
निमेषोन्मेषरसनानेत्राङ्गान्यायूंषि यौवनम् ।
स्नेहशक्रधनुःस्वामिप्रसादस्वप्नदुर्जनाः ॥ १९२ ॥
स्वेगान्यनिलेन्द्राश्वमनस्तार्क्ष्योऽश्वहृकशराः ।
नदी विमानहनुमन्तौ मीनोष्ट्रोणपक्षिणः ॥ १९३ ॥
मन्दानि शनिः पङ्गुर्मुनिर्यालो नितम्बिनी ।
सज्जनः पुण्यपुरुषो हंसो वृषभहस्तिनौ ॥ १९४ ॥
बलिष्ठानि शिवो विष्णुः स्कन्देन्द्रगरुडानिलाः ।
श्रीरामहनुमद्भीमा बलदेवो बलिः पविः ॥ १९५ ॥
सुदर्शनं सुरा दैत्याः पञ्चास्यशरभौ गजः ।
महावराहदिग्दन्तिशेषकूर्मकुलाचलाः ॥ १९६ ॥
पृथुरैरावतश्चक्री सतीस्वान्तं पुराकृतम् ।
प्रतिपन्नं प्रतिज्ञा च महतां स्त्री जडा ग्रहाः ॥ १९७ ॥
अबलिष्ठानि रोगार्तबालक्षुधितकातराः ।
बलात्कृतानि कार्याणि नारी पापघ्नो नृपः ॥ १९८ ॥
क्रूराणि सर्पमार्जारमकरव्याधपोत्रिणः ।
हर्यक्षदुर्जनश्येनस्तेनप्रत्यन्तवासिनः ॥ १९९ ॥
भद्राणि शिशुः साधुर्धार्मिको धर्मनन्दनः ।
सुस्वामिभूम्यमित्राणि तरसा गौः सुगेहिनौ ॥ २०० ॥

मधुरध्वनयो हंसमयूरपिकसारसाः ।
कामिनी कुररः कङ्ककीरपारावतालिनः ॥ २०१ ॥
चातकः ककुदः केलिकिङ्किणी घर्घरावली ।
वेदना दुन्दुभ्याद्या वालादिपदघर्घराः ॥ २०२ ॥
वेणुवीणादिमञ्जीरमेखलाकङ्कणक्वणाः ।
गन्धर्वाप्सरसौ हाहाहूहुतुम्बुरुकिंनराः ॥ २०३ ॥
गान्धारगायिनो हंसाः केकिनः षड्जकेकिनः ।
कोकिलाः पञ्चमोल्लापाः क्रौञ्चा मध्यमराविणः ॥ २०४ ॥
कलभा निषादरावा धैवतध्वनयो हयाः ॥ २०५ ॥
वृषभा ऋषभारावा विज्ञेयाः स्वरवेदिभिः ॥ २०६ ॥
कठोरटिटिभूकघट्टकरभाः खराः ।
मण्डूककोलकाकोलकपोताः कुक्कुटः शिवा ।
कपाटानां खटात्कारा श्टङ्खलानिगडारवाः ॥ २०७ ॥

षट्पदी ।

महाशब्दा घनेन्द्रेभताक्ष्र्यपञ्चाब्धिवीचयः ।
अब्धिमन्थः शिवस्याट्टहासस्तु डमरुध्वनिः ॥ २०८ ॥
सिंहोष्ट्रहनुमद्रक्षःपिशाचताराविलो रथाः ।
गान्धर्विहरणाश्रौघमल्लदोःस्फालनध्वनिः ॥ २०९ ॥
निर्घातरथघोषज्याटङ्कारो गजवाजिनः ।
भटढक्काः शिलोच्चारस्फारनिर्झरघर्घराः ॥ २१० ॥
घण्टाश्चौल्यगजादीनां कन्दरादिप्रतिध्वनिः ।
वीराणां निनदो हूत्कारणं हदितालवः ॥ २११ ॥
ततं वीणाप्रभृतिकं तालप्रभृतिकं घनम् ।
वंशादिकं तु सुषिरं विततं मुरजादिकम् ॥ २१२ ॥
एतच्चतुर्विधं वाद्यं नन्दी पञ्चारवो मतः ।
नान्दी द्वादशतूर्याणां निर्घोषो नाटकादिषु ॥ २१३ ॥
भम्भा मउन्द मद्दल करडा भल्लर हुडुक्क कंसाला ।
भेरी तिलिमा वंसो सङ्खो पणवोध नाडपे नन्दी ॥ २१४ ॥
डुक्का टक्का डमरु अवादल वुक्क भेरि कालपं पटुहो ।
तुण सङ्ख अरड वीणा घमद्द कंसाल रवे नन्दी ॥ २१५ ॥
कम्पादि तु कर्पूरकस्तूरीघनचन्दनाः ।
वासो मलयजं धूपोऽगुरुर्मृगमदो नखः ॥ २१६ ॥
सुगन्धितैलं स्वर्णं पुष्पाणि कुसुमद्रुमैः ।
पद्मिनीस्त्रीमुखं मेघसिक्तोर्वीदन्तिपर्वकः ॥ २१७ ॥
आलोपकोलवकुलावबोलौ अतिचारकम् ।

तज्ञा तमालपत्राणि मधसमच्छदौ मदः ॥ २१८ ॥
शालयः कुसुमं जाती केतकी बकुलोऽम्बुजम् ।
पाटलाचम्पको मल्ली करुणी शतपत्रिका ॥ २१९ ॥
दुर्गन्धानि वपुःस्वेदकुथिताम्रादिपूतयः ।
मूत्रस्नानादिदेहानि पुरीषापानमारुतौ ॥ २२० ॥
शिशिराणि सज्जनवचः प्रभुः प्रसादेष्टसङ्गसत्सङ्गाः ।
काव्ययशःसन्तोषाः सुधाम्बुहेमन्तहिमकराः करकाः ॥२२१॥
उष्णानि तरणिर्वह्निर्वाडवः शिवभालदृक् ।
कालाग्निरुद्रगोविन्दचक्रब्रह्मानलाब्जभाः ॥ २२२ ॥
वज्रं विद्युद्दवो ग्रीष्मः कारीषाग्निर्हसन्तिका ।
आधिर्भ्राष्ट्रो ज्वरो धर्मः प्रतापो दुर्वचस्तपः ॥ २२३ ॥
क्षुद्दीपशापदुर्वासःक्रोधवैरिपराभवाः ।
सपत्नीष्टवियोगेष्टकृतावज्ञास्मरज्वराः ॥ २२४ ॥
कोमलान्यङ्गनाङ्गानि शिरीषं नवपल्लवाः ।
हंसरोमाणि कदलीस्तम्भाः पट्टांशुकान्यपि ॥ २२५ ॥
कठोराणि शिला शैलो वज्रं दुर्जनमानसम् ।
कुस्वामिभृत्यमित्राणि कृपणो शाकिनीमनः ॥ २२६ ॥
लोहं वैरिमनो हस्ती नृहस्ततरुणीस्तनौ ।
कृतघ्नो नालिकेरीङ्गुदीकपित्थफलानि च ॥ २२७ ॥
मधुराणि विदग्धोक्तिकाव्यगीतप्रियाधराः ।
सुधामधुपयोनालिकेरीरसशशित्विषः ॥ २२८ ॥
द्राक्षाम्रदाडिमीरम्भाराजादनफलादिजाः ।
रसाः पुष्परसाः कीर्त्तिर्गुडखण्डेक्षुशर्कराः ।
सुरा शिखरिणी मस्तु पायसं पानकानि च ॥ २२९ ॥
[illegible] ।
[illegible] ॥ २३० ॥

अथक्षार· स्वर्जिकाजमूत्रं लवणवारिधिः ॥ २३१ ॥
तिक्तानि मरिचं शुण्ठी सरणं शृङ्गवेरकम् ।
पिप्पली पिप्पलीमूलमजमोदाद्यस्तथा ॥ २३२ ॥
अम्लानि बीजपूराणि जम्बीरकरणाम्लिकाः ।
आरनालकपित्थानि निम्बुकान्यम्लवेतसम् ॥ २३३ ॥
द्रवाण्यमृतपानीयघृततक्रपयःसुराः ।
तैलाम्रमकरन्देक्षुरसः शिवलिङ्गं मधः ॥ २३४ ॥
मषीमदाधुदधिरमूत्रप्रस्वेदपारदाः ।

अपरस्याप्यनुवर्ज्यजलचन्द्रोपलद्रुमाः ॥ २३५ ॥
तेजस्विनो रविश्चन्द्रतारानिम्नगपारदाः ।
मेघदर्पणखद्योता रूप्यं वह्निश्चार्के मणिः ॥ २३६ ॥
सूर्येन्दुकान्तवैडूर्यमुक्ताविद्रुमहीरकाः ।
पद्मरागो मरकतं वैडूर्यं राजपट्टकः ॥ २३७ ॥
सुरूपा मदनश्चन्द्रानिरुद्धनलकूबराः ।
अश्विनीपुत्रनकुलनलदेवाः पुरूरवाः ॥ २३८ ॥
दानिनः कामधुक्चिन्तामणिकल्पद्रुमावलिः ।
जीमूतवाहनः कर्णदधीचिशिबिविक्रमाः ॥ २३९ ॥
बलिनः शिवकृष्णेन्द्रा भार्गवो रामलक्ष्मणौ ।
पार्थभीमकृपद्रोणद्रौणिकर्णाभिमन्यवः ॥ २४० ॥
आधाराः स्वर्गभूर्दिक्पातालाद्रिपरद्रुमाः ।
नीरधामपुरागारमालादाः स्थलमम्बरम् ॥ २४१ ॥
पूर्वोऽमरावती भोगावती लङ्काऽलका तथा ।
विदर्भा मिथिलाऽयोध्या काम्पिल्यं कुशस्थलम् ॥ २४२ ॥
कौशाम्बी त्रिपुरी काशी मथुरा हस्तिनापुरम् ।
अवन्ती पाटलिपुत्रं काञ्ची द्वारावती गया ॥ २४३ ॥
विदिशा निषधा कोटीवर्षं ताम्री तमालिनी ।
माहिष्मती भृगुकच्छः काम्पिल्यं धारणावतम् ॥ २४४ ॥
राजानः पृथुमान्धातृधुन्धुमाराः पुरूरवाः ।
हरिश्चन्द्रो भरतश्च कार्तवीर्ययुधिष्ठिरौ ॥ २४५ ॥
मनुः ककुत्स्थनहुषौ भगीरथनलौ रघुः ।
अजो दशरथो रामपुत्रौ श्रेणिकसम्प्रती ॥ २४६ ॥
विक्रमः प्रतिष्ठाने शालिवाहनभूपतिः ।
उज्जयिन्यां विक्रमार्कं मुञ्जभोजनरेश्वराः ॥ २४७ ॥
मन्त्रिणो वाक्पतिः शुक्रो जाम्बवान् माल्यवानपि ।
[illegible] ।
यौगन्धरायणो मुद्राराक्षस[illegible] ॥ २४८ ॥

इति श्रीजिनद० कवि[illegible] चतुर्थे [illegible] प्रथम [illegible] ।

---

अथ बहुलार्थोत्पत्ति कथ्यते—

[illegible] संख्यावाचक[illegible] ।
[illegible] समर्पयेत् ॥ २४९ ॥

[illegible]

संख्यस्तदाऽन्येऽपि द्विसंख्याः । यदा त्रिसंख्यस्तदाऽन्येऽपि त्रिसंख्याः । एवमन्ये तत्संख्या अङ्कुरेण केनापि संकलिताः काव्ये संगृह्यन्ते । उदाहरणानि स्वस्वसंख्ये दर्शयिष्यन्ते । एकादिसंख्यासंग्रहो यथा—

आदित्यमेरुचन्द्रप्रासादा दीपदण्डकलशाश्च ।
खड्गहरनेत्रशशिरथदेवकाङ्कुशहस्तिकराः ॥ २५० ॥
मासार्धशयविनायकदन्तपताकामनांसि शक्राभ्रः ।
अद्वैतवाद एकैक यथामी सुकविभिर्वर्ण्याः ॥ २५१ ॥

यथा—

एकदन्तो जयत्येकदन्तस्तम्भं दधत्पुरः ।
यो बध्नीव जगद्विघ्नविघाताद्वैतमात्मनः ॥

भुजदृष्टिकर्णपादस्तनसन्ध्यारामलक्ष्मणाः शृङ्गे ।
गजदन्तौ प्रीतिरती गङ्गागौर्यौ विनायकस्कन्दौ ॥२५२॥
पक्षनदीतटरथधुर्यबाहुधाराश्च भरतशत्रुघ्नौ ।
रामसुतौ रविचन्द्रावित्येते द्वन्द्वगा वाच्याः ॥ २५३ ॥

उदाहरणानि—

किं भूधरौ शशिरविनिलयौ किमन्यौ रामाच्युतौ किमु गणेशगुहाविहैतौ ।
एतौ पुनः किमुदितौ रघुरामशत्रुघ्नावित्याकुलैर्नृपकुलैः सहसैव दृष्टौ ॥
आश्लिष्यतामथ भुजाविव विक्रमस्य मूर्तौ समागमुवमेकधनुर्भृतौ ।
नरस्य इने धनुषि समगुणेऽर्जुनेन भीमो महाद्रिभुजाय भुजामर्षात् ॥
प्रविष्टौ कुरुक्षेत्रेऽनु युगं भीमघटोत्कचौ ।
मध्येऽनु समभेत्र द्वौ बाहवस्य कराविव ॥
पीड्यमाना द्वई ताभ्यां त्रिपदोऽप्येकमिव त्रिधा ।
भिन्देर न चकम्पे न संमुमोह न सा चमूः ॥

भुवनवलित्रिवह्निविधासन्ध्यागुणाग्निमुनेत्राणि ।
त्रिशिरोमौलिदृशाचेतराकालकामुनिदण्डाः ॥ २५४ ॥
त्रिफलात्रिशूलमुद्राः पक्षावृत्रकालिदासकाव्यानि ।
वेदाश्वरथाः कम्बुग्रीवारेखा त्रिकूटकूटानि ॥ २५५ ॥
हरहस्तमुनिविद्यामायामा यज्ञोपवीतसूत्राणि ।
त्रैवेदत्रयत्र(?)स्तत्रिणागुणिसिद्धयादि ॥ २५६ ॥
मुद्राजग्रामगोत्वेगिवमवमार्गाः शुभेतरा लेश्याः ।
सर्वेऽप्यमी त्रिसंख्योपेताः काव्ये निबन्धव्याः ॥२५७॥

यथा—

[illegible] इति त्रिलोकः ।
मूर्ध्नि दधाति त्रिपथगवत्या [illegible] ॥
कि [illegible] ।
[illegible] ॥

साध्येन धारिसम्पाशेर्षोराद्विलीयविम्बनः ।
त्रिमूर्तिरिव रेजेऽसौ त्रिवेदीवेदिशोऽर्जितम् ॥

ब्रह्ममुखवेदवर्णा हरिभुजसुरगजरदवसुदिक्कालमाः ।
सङ्घसमुद्राश्रमधातुगोस्तनाश्रमकषायदिशः ॥ २५८ ॥
गजजातिपापसेनाङ्गदशदन्ता महाजने धविज्ञः ।
बृहत्कथापुत्रोपायाध्यानकषायजितयरीनिरोधकरणाः ॥ २५९ ॥
मानवस्तवककराङ्गुलिस्तनाग्रुरमेरवाम्बुजनखाः ।
एते सलोकपालाः काव्ये बोध्याश्चतुःसंख्याः ॥ २६० ॥

यथा—

संध्यासिन्धुवृत्तोपवरोषावस्तीर्णेकाव संबोधिनो
मार्गानुपगमप्रमादसर्वापामान् निवामाश्रयान् ।
वेलालोलपुरप्रयाणपुरवान् ध्यामोहकारागृह-
द्वारप्राहरिकान् क्षिपन्ति चतुरः केचित् कषायरिपून् ॥
कृशोदर्याः सहसा मनस्विनः सखोदरार्त्त परिवर्ति नृपम् ।
गुहस्मितो हस्तमिवात्तहरणविहरामिहार्थ वर्णानादश वरः ॥

कमरबाणपाण्डवेन्द्रियवराङ्गुलीशम्भुमुखमहापकाः ।
विषयव्याकरणाङ्गमतपञ्चिदग्तुपार्श्वपाणिकरणाहवैव ॥ २६१ ॥
परमेष्ठिमहाव्रतव्यवसायकलनुयानगुणशिरस्तनाराः ।
पञ्चकुलमहाभूताः प्राणामपञ्चाशरयिमानाः ॥ २६२ ॥
महाप्रसमरप्रतानमिनिरयामवानि च ।
शास्त्रप्रमरस रथेनानि पञ्चपात् पञ्चसंख्यया ॥ २६३ ॥

यथा—

पञ्चेषुद्विषभेदपञ्चवदनः पञ्चजनस्वस्तरः
स्वर्णाद्रिः समुद्रभिरविवरव्यापारदृशुन्माद ।
पञ्चाङ्गुलिधतिगुणपञ्चमतिः प्रस्थानपञ्चाव
तेजः पञ्चसमिन्द्ररादिविलवः षड्भिर्गुणानां अथ ॥
कर्णेन मुकुटवतैनर्वा पारपातैः परिवारितानां ।
षड्भिर्गुणानीव पावनिम्ना हाम् द्रौपदेयाव विभुरिक्काः ॥

रसरागमञ्जलेयाध्यिनिरीक्षरनास्तनाविगुणस्वर्तं ।
दर्शनमुहुमुखभूजरणदवचिन्तु कतुरिह षट्संख्याः ॥ २६४ ॥

यथा—

अम्भोदमूर्त्तिः सारङ्गधारा पङ्क्तिमुखैः षण्मुखं दधत् ।
अम्बुजकराणेव निः सृष्टकरैर्ष्टीष्टरूपितिहासमन्दकालि ॥

विवाहदशनाककृशवाहमुरजदुर्गनिरमुद्राः ।
अवगत्यपर्वपर्वतोदयार्धरथाम्भो दश ॥ २६५ ॥

यथा—

त्रैलोक्याम्बरसत्तनिर्भयमयब्रह्मान्मनोज्ञालय-
स्तम्भाः दुस्तरसद्दुर्गतिद्वारगोधार्गलाः ।
प्रीतिप्रोक्षितमस्तनस्त्वविरिरिवो वृतनूतनाङ्कुरा-
कीर्ति सत्तभुजङ्गपुङ्गवफणाः पार्श्वप्रभोः पान्तु वः ॥

दिग्देशकुम्भिपालाः कुलपर्वतशम्भुमूर्तिवसवश्च ।
योगाङ्गव्याकरणमहाभूत्याहिकुलान्यष्टौ ॥ २६६ ॥

यथा—

भयाश्वनीमारमुरीत्थकार जयातिरेकप्रवरो ययातिः ।
गीतं दिगन्तेषु यशो यदीयं श्रोतुं दृशेऽष्टश्रुतिनां विधाता ॥

भूखण्डरत्नरायणमुण्डसुधाकुण्डजैनपद्मानि ।
ग्रैवेयरसव्याघ्रीस्तनगुप्तिनिधिग्रहास्तु नवसंख्याः ॥ २६७ ॥

यथा—

ख्याते यत्र नवपदार्थसिरदयं भायानि तत्त्वानि यो
व्याचख्यौ न च यस्य वाङ्नवसुधाकुण्डत्वराकारिणी ।
नित्यं यत्पदपद्मयुग्मपुरतः पद्मानि देवा नव
व्यातेनुर्नवमो जिनः स जयति श्रीपुष्पदन्तप्रभुः ॥

रावणमुखाङ्गुलीचन्द्रयाहयतिधर्मशम्भुकर्णदिशः ।
अङ्गद्वाराश्चस्थादशाः पुनः संख्यया दशैव स्युः ॥ २६८ ॥

यथा—

निजाश्रुनीरैः स्नपिता द्विपद्भिः प्रदीपिता मौलिमणीमृजाभिः ।
दशापि यत्पादनखाः समीयुर्दिशां दशानामपि दर्पणत्वम् ॥

रुद्राक्षनेत्राण्यप्यङ्गोपाङ्गकानि जिनमतोक्तानि ।
एकादश ध्रुवाः स्युस्तथा जिनोपासकप्रतिमाः ॥ २६९. ॥

यथा—

पार्श्वः सोऽस्तु मुदे न तस्य फणिनः मस्तास्यचूडामणी-
संक्रान्तः किल योऽष्टमूर्तिरजनि स्पष्टाष्टकर्मच्छिदे ।
यद्वत्तं दशदिग्जनव्रजमभित्राणु तथा सेवितुं
यं यत्पादनखाविशत्तनुरभूदेकादशाङ्गोऽपि सः ॥

गुह्यनेत्रराशिमासाः सङ्क्रान्त्यादित्यचक्रराजानः ।
चक्रिबृहस्पतिहस्ताः सभासदो द्वादश भवन्ति ॥ २७० ॥

यथा—

येन द्वादश सद्व्रतानि धनिनां ता द्वादशानुक्रमं
भिक्षूणां प्रतिमास्तथा निदधिरे सद्भावतो द्वादश ।
यत्र द्वादशकल्पवासमनिदेव्याङ्घ्रिभवे द्वादशे-
ऽङ्गानि द्वादश संजगौ जिनपतिः शान्तिः स वोऽस्तु श्रिये ॥

[illegible]

यथा—

[illegible]

यथा—

[illegible]

यथा—

[illegible]

यथा—

[illegible]

यथा—

[illegible]

यथा—

[illegible]

यथा—

[illegible]

पादाङ्गुलीभिर्युधि केऽपि केऽपि कराङ्गुलीभिः परिघूर्णनीयाः ।
धारया द्विपोऽमी शतमित्यमर्षात् कृष्णाद्यतैः पञ्चभिरप्यमापि ॥

अहिपतिमुखगङ्गामुखपङ्कजदलरविकरेन्द्रनेत्राणि ॥ २७७ ॥
विश्वामित्राश्रमयपार्जुनभुजसामवेदशाखाश्च ।
पुण्यनरदृष्टचन्द्राः सहस्रसंख्या अमी ज्ञेयाः ॥ २७८ ॥

यथा—

सहस्रपत्रपत्राणां प्रत्येकं स्मेरताकृते ।
सहस्रकाविस्तारं किं सहस्रकरोऽकरोत् ॥

एवमत्र ग्रन्थगौरवभयादसङ्कलिता अपि संख्याः काव्योपयोगाय प्रेक्षावद्भिः प्रेक्ष्याः ॥

इति श्रीजिनदत्त० अर्थसिद्धिप्रताने चतुर्थे संख्यास्तवकः षष्ठः ॥

---

अथ समस्याक्रमः—

कल्पादिसिन्धुलघुभिर्गुरुता

लघोः पदार्थस्य कल्पादिकालेन सिन्धुना लघुभिश्च गुरुता विधेया ।

कल्पादिकल्पना यथा—

कल्पादिकाले गुरुदेहदेशा 'पिपीलिका राजति शैलतुल्या' ।
तस्मिंश्च सत्यं धरणीधरोऽपि विगाहते देवगिरीन्द्रशोभाम् ॥

यतः कल्पादौ सर्वोऽपि पदार्थो गुरुतरो भवति ततः सर्वत्रापि लघुपदार्थस्यौचित्येन कल्पादौ गुरुत्वमारोप्यम् ।

सिन्धुना यथा—

अहो पयोराशिविलासिवादः 'पिपीलिका राजति शैलतुल्या' ।
सदा जनानां महतां निसर्गो दत्ते लघूनामपि गौरवाणि ॥

यावन्तो दृश्यन्ते नरकरितुरगादयः स्थले जीवाः ।
तावन्तः सलिलेष्वपि जलपूर्वास्तेऽपि निर्दिष्टाः ॥ २७९ ॥

तत्र समुद्रस्थितानां लघूनामपि जीवानां गुरुत्वमस्त्येव । लघुभिर्यथा—

कुन्थुप्रमाणेन महत्तमाङ्गी 'पिपीलिका राजति शैलतुल्या' ।
यस्मादधोधः परिदर्शनेन सदा लघूनामपि गौरवाणि ॥

इत्यादि । एवं रीतित्रयमध्यात् यत्र या या रीतिरौचित्येन घटते तया तया रीत्या सर्वत्रापि लघुपदार्थस्य गुरुताऽऽरोप्या ॥

युगान्तदूरावलोकगुरुभिर्लघुता विधेया ।

गुरुपदार्थस्य युगान्तेन दूरावलोकेन गुरुभिश्च लघुता विधेया । युगान्तेन यथा—

कल्पान्तकालमथितोरुसमुद्रदेशः 'कीटो बिभर्ति परमाणुसमत्वमेव' ।
पूर्वं युगादिसमये विमलत्वमूर्व यो ज्ञानरूपधरमौलिसमन्वयम् ॥

यत्र कल्पान्ते सर्वे पदार्था लघवः सम्भवन्ति, तत्र कल्पान्तेन गुरुपदार्थस्य लघुत्वमारोप्यम् । दूरावलोकनेन यथा—

स्थूलोऽल्पोऽपि परमाणुवदत्र भात्यगाद्रिमानसदृशे बकाभिलीनाम् ।
अभ्यागतो नयनवर्त्मनि सत्यमेव 'गौरो बिभर्ति परमाणुसमत्वमेष' ॥

यतो दूरस्थितः पदार्थो गुरुरपि सूक्ष्म इव भासते । गुरुभिर्यथा—

कल्पान्तकालपरिणोधरणप्रवृद्धकोलाधिराजतनुमानविलोकनेन ।
'गौरो बिभर्ति परमाणुसमत्वमेष' यो कल्प लाघवमहो गुरुसन्निधाने ॥

इत्यादिगुरुतरपदार्थैर्गुरुपदार्थस्य लघुता विधेया । एवं रीतिद्वयमत्रापि यत्र या रीति-
र्रुचिरत्वाद् घटते तत्र तया रीत्या लघुता विधेया ॥

नीरादिषु प्रतिबिम्बवशेन युग्मम्

नीरदर्पणमणिभूमिप्रभृतिषु प्रतिबिम्बवशेन एकमपि वस्तु युग्मरूपं भवति । यथा—

पश्चिमाद्रेर्मणिगिरिःक्रान्ते पूर्वाद्रिगे रवौ ।
लोकैर्वितर्क्यते किं भोः 'समुदेति रविद्वयम्' ॥

कूपेन प्रतिबिम्बवशेन च वैपरीत्यम् ॥ २८० ॥

अधोमुखीकृतकूपेन प्रतिबिम्बितेन च वैपरीत्यं कार्यम् । यथा—

कालियाहिमहाध्वंसे यमुनायां जगन्निधौ ।
कम्पयाऽधोमुखे जाते विपरीतं जगत्त्रयम् ॥
तडागो दर्पणप्रायसमश्रकान्तितोऽभवत् ।
जलान्तस्थाकृतः कूपप्रासादः कलशोपरि ॥
अस्ताद्रिमस्तकमणिगणभासामादर्शमधिमध्यौ प्रतिबिम्बिताङ्गः ।
आरारुहे द्विगुणे चरणेन सोऽयमभ्युदितो दिनकरः खलु पश्चिमायाम् ॥
भूपाल ! तव यशस्य भ्रमतिरधोमुखी ।
पयोधिप्रतिमा भाति नभसाविपर्ययेऽन्तरे ॥

एवं रीतिद्वयमध्यात् यत्र या रीतिरौचित्याद् घटते तत्र तया रीत्या निर्वाहणीयम् ।
केनापि प्रयोगेण विपरीतीकृतेन वसुन्धराकूपमध्यस्थितः सर्वोऽपि पदार्थो विपरीतो
भवतीव । तस्यैव सूत्रकाव्यस्य प्रतिबद्धा समस्या यथा—

'कल्पादिसमये यस्मिन् कीटिका कुम्भिसन्निभा ।
कुम्भी पुनर्महाशैलस्पर्धिदेहाकृतिस्तदा ॥ २८१ ॥
माहात्म्यं तस्य पाथोधेर्व्याप्यातुं कुत्र शक्यते ।
सापि यत्र यतो लोपकीटिका कुम्भिसन्निभा ।
परमाणुमनोरग्रे कीटिका कुम्भिसन्निभा ॥ २८२ ॥
कुम्भीन्द्रोऽपि सुवर्णाद्रिमानतः कीटिकायते ।
युगान्तसमये यस्मिन् वारणः कीटिकासमः ॥ २८३ ॥
तस्मिन् पिपीलिकामानं लभतामिति न कश्चित् ।
महागिरिशिखरस्थानां वारणः कीटिकायते ॥ २८४ ॥
महापर्वतमानेन वारणः कीटिकायते ।
साधुविचारानुमानेन पर्वतः कीटिकायते ॥ २८५ ॥

पूर्वाद्रौ रत्नभिरयन्नर्जोनाद्रिप्रतिबिम्बितः ।
शङ्क्यते शक्रकान्ताभिः किमुदेति रविद्वयम ॥ २८६ ॥
यमुनाह्रदसम्पायामधोवक्त्रे जगन्निधौ ।
तदा सम्भाव्यते नूनं स्वर्गोपरि मही यमौ' ॥ २८७ ॥
चन्द्रान्धकाररविकीर्तिकुकीर्तिसन्ध्या-
रागादिसङ्गकृतवर्णविपर्ययेण ।

कृष्णरक्तपीतनीलाद्यो वर्णाश्चन्द्रेण श्वेताः क्रियन्ते । यथा—

पर्णोद्गमहिमद्योतद्योतिविद्योतितोऽभितः ।
कैलासगिरिलङ्काशः 'काचने विन्ध्यभूधरः' ॥
जपापुष्पं जातिसमं सुवर्णं रजतप्रभम् ।
सुधाकरकरस्पर्शो'ऽनघौ चन्दनद्रुमौ' ॥

रक्तपीतश्वेताद्यो वर्णा अन्धकारेण कृष्णाः क्रियन्ते । यथा—

कैलासो विन्ध्यसङ्काशः कर्पूरः कज्जलप्रभः ।
जरा तापिच्छगुच्छश्रीरन्धकारैर्विनिर्ममे ॥

कृष्णश्वेताद्यो वर्णा बालार्केण सन्ध्यार्केण रविणा वा रक्ताः क्रियन्ते । यथा—

कज्जलं कुसुमच्छायं जातीपुष्पं जपासमम् ।
सुवर्णं पद्मरागाधि प्रभातार्कप्रभाङ्गनम् ॥

अनया रीत्या सर्वत्राऽप्यौचित्येन वर्णविपर्ययः क्रियते । यदि पुनश्चन्द्रान्धकार-रवीणामेव वर्णविपर्ययः क्रियते तदा कीर्तिकुकीर्तिसन्ध्यादिभिस्तेषामेव वर्णविपर्ययः क्रियते । यदाऽन्यवस्तूनामपि चन्द्रादिभिरिव तैर्वर्णविपर्ययः क्रियते । यथा—

स्वर्धुनीमलिनभ्रिमस्कुरद्भावकोमलकौमुदीमण्डलैः ।
विन्दुभिस्त्विषगति क्षमापते ! 'शीतरश्मिरिव भासते रविः' ॥

अन्यवस्तूनां यथा—

मेदिनीदयित ! तावकैर्यशः सङ्कुलैः समुदयैः समुच्छ्रितैः ।
क्षीरनीरनिधिमोमकोमठे. 'कज्जलं रजतमप्रिभं बभौ' ॥
हिमाद्रिसदृशो मेरुः कुङ्कुमं शशिसन्निभम् ।
भूमीश्वर ! भवत्कीर्त्या शोभिते भुवनत्रये ॥

यथा—

भूमिपाल ! भवदीयविद्विषन्मेदिनीपतिकुकीर्तिरश्मिभिः ।
प्रावृषेण्यजलदाङ्गकान्तिभिः 'श्यामलो भवति यामिनीपतिः' ॥

अन्यवस्तूनामपि यथा—

मेदिनीदयित ! तावकद्विषत्सैन्यपालिकृतया...
अन्धकारनिभकीर्तिदीधितिः 'कुङ्कुमं भवति
हिमाद्रिविम्बवन्मुखीः स्वर्णं शरकम्बयम्
महीश्वर ! तव द्वेषिकुकीर्तिदर्शिनीदेवी ॥

सन्ध्यया वर्णविपर्ययो यथा—

पूर्वभूधरशिरस्तटीगतः सान्ध्यरागपटलैः परावृतः ।
प्रेक्ष्यतेऽत्र रजनीमुखेऽधुना 'विद्रुमप्रतिमदीधितिर्विधुः' ॥

सन्ध्ययान्यूनां यथा—

कान्तकीरपरवामलोचनालोचनाम्बुविनताञ्जनद्युतौ ।
सान्ध्यरागपटले सति क्षणं 'कज्जलं भवति कुङ्कुमोपमम्' ॥
स्वर्णं सिन्दूरधूलिश्च कर्पूरं पद्मरागरुक् ।
जपाकुसुमसङ्काशैः सन्ध्यारागभरैरभूत् ॥

अथ वर्णान्तरसङ्गाद्वस्तूनां वर्णविपर्ययः क्रियते । यथा—

कालिमुकुटललाटे सीमन्तगण्डशालोविकासितसूक्ष्माभिव्यक्तघर्माम्बुसिन्धुः ।
समजनि मरकतशिलामलो यामिनीशः 'भवति मलिनसङ्गात्कश्मलत्वं न को वा' ॥
मधुपमधुपपुञ्जप्रविलापप्रपञ्चमरकुचकम्पवनविलासैः कम्बुकण्ठोज्ज्वलोऽपि ।
समरसमरणत्वं कामिनीकण्ठहारो 'जगति भवति रागो रागिसङ्गान्न कस्य' ॥
क्षितिभवपतिपुत्रीमौलिकस्थलीकमङ्गीलितवक्रमालाकान्तिजालावलीढः ।
हिमकरकिरणविभ्रमीभीलकण्ठस्य कण्ठो 'भवति विमलयोगान्निर्मलत्वं न कस्य' ॥

एवमनया रीत्या सर्वत्राप्यूह्यम् ।

धर्मध्यानध्यमनसिका स्पष्टमष्टाङ्गयोगात्
केयं बाला पलितदृशना पाण्डुरीभूतकेशा ।
अलिव्यक्तप्रणतशशाभूत्या द्रागाप्रकाशे
ज्योतिर्जालैर्विपुलधवलैर्दीप्तिनीरविहारधीरैः ॥

रङ्गेऽस्मिन् रङ्गदभ्रैर्विहगरुहवलभीवर्धवैदूर्यनिर्य—
ज्ज्योतिर्भातप्रवाहा द्युतिकरविधुरीभूतशोभा विभूतिः ।
कालिन्दीबालकान्तिः समजनि रजनीजीवितध्वाधिनाथो
'धत्ते को वा कलावानपि न हि मलिनासङ्गतः कश्मलत्वम्' ॥

अहो राहुमुखग्रस्तसमस्तोज्ज्वलमण्डलः ।
इन्दुः कज्जलबिन्दुश्रीदीनैः कस्य न विप्लवे ॥

एवं सर्वत्रापि सङ्गवशाद्वर्णव्यतिक्रमो विधेयः ॥

दृष्टान्तवद्व्यपदिश्यन्ततया

द्वितीयवस्तुनिदर्शनं दृष्टान्तः, तद्वस्तुस्वभावादन्यस्मिन्नर्थे यदिशब्दे यदिशब्देन संयुज्यते समस्या पूर्यते ।

यथा—

प्रतीच्यां यदि मार्तण्डः समुदेति स्फुरत्करः ।
तदा सञ्जायते नूनं 'मरिचिर्हिमशीतलः' ॥

पुराणैः

एवं सर्वत्र । पुराणमुनिचरितैः समस्या पूर्यते । यथा—

अगस्तिमुनिनिष्पीतनिःशेषजलमण्डलात् ।
अहर्दतिमहःपुञ्जात् 'समुद्राद्वह्निरुत्थिता' ॥

इति चिन्तनीयम् ॥

धारमद्यशोकमधुघातवियोगमाद्यैः ॥ २८८ ॥

धारमद्येन समस्या पूर्यते । यथा—

मधुच्छन्नधारमद्यपिष्टाम्भोभृतचेतसा ।
गोमयमूर्तिः क्षमा व्याघ्रो जनन्या मन्यते ध्रुवम् ॥

इत्याद्यूह्यम् । शोकेन, मधुना, घातेन, उन्मादेन समस्या पूर्यते । य
वियोगमाद्यैर्व्यासः पुमानघटमानमपि जल्पति ॥

स्वप्नेन्द्रजालिकमतिभ्रमचित्रमाया
मन्त्रौषधीमणितपःपदभङ्गभावात् ।
शौर्योष्मवाञ्छितमनोगतिपुण्यदैव-
प्रश्नोत्तरक्षयसमासविभिन्नसाध्याम् ॥ २८९ ॥

स्वप्नेन समस्या सिद्ध्यति । यतः स्वप्नेऽघटितमपि सर्वं घटते । यथा-

निद्रामुद्रापरिचयलवान्मुद्रितानन्तचिन्ता
चित्ते चित्ते निभृतममृतज्योतिषि स्नानधाम्नि ।
प्रातः स्वप्नेऽरुणकपिशितं प्राग्दिशैकोऽथ तस्मा-
दाकाशार्धं जलधरपदं दृष्टिहीनो ददर्श ॥

'अहो ज्योतिष्कशादृश ! मया स्वप्नेऽमुकं दृष्टं, त्वं विचारयेत्यादि कल्
इन्द्रजालेनाऽघटमानमपि सर्वं घटते । तथा मतिभ्रमेणापि सर्वं
चित्रे त्रिसहस्रमपि लिखितं संभवति । 'अहो चित्रकृत ! ईदृशं चित्रं चित्रे
रचनीयम् । माययाऽपि त्रिसहस्रं सम्भाव्यम् । मणिमन्त्रौषधिप्रभावेन सर्वं
यस्मादचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः । तपसाऽपि सर्वं साध्यते ।

'यद्दूरं यद्दुराराध्यं यच्च दूरे व्यवस्थितम् ।
तत्सर्वं तपसा साध्यं तपो हि दुरतिक्रमम्' ॥

इति, तपसाप्यघटमानं सर्वं घटते । पदभङ्गभावादपि समस्या पूर्यते ।
'मृगात्सिंहः पलायते' । मृगमत्तीति मृगात् सिंहविशेषणम्, पलाय मांसाय, इ

अयं मृगः समायाति 'मृगात् सिंहः पलाय ते' ।
ततो वेगात् पलायस्व स्वस्ति स्वस्ति. पदे. ॥

इत्याद्यूह्यम् । शौर्योष्मणा वाञ्छितेन मनोगत्या पुण्येनाऽघटमानमपि
दैवप्रसादेनाऽसाध्यमपि साध्यते ।

निःस्वाकोऽपि विभो ! विमातसमये पश्यत्यवश्यं मुदा
यस्त्वं पद्ममानमानसमसौ स्यादिन्दिरामन्दिरम् ।
श्रीवामेय ! किमु स्तुमस्तव परं यस्य प्रमादाद्भुते-
'र्मूको जल्पति संशृणोति बधिरः पङ्गुर्नरो नृत्यति' ॥

इत्यादि । प्रश्नेन समस्या पूर्यते । यथा—

कस्तूरी जायते कस्मात् को हन्ति करिणां कुलम् ।
किं कुर्यात् कातरो युद्धे 'मृगात् सिंहः पलायते' ॥

इत्यादि । एकसमासविभिन्नशब्दत्वात् समस्यायां यत्साध्यं पदं भवति तत् अन्य-समासेन विभिन्नं क्रियते, तदा सर्वापि समस्या भिद्यति । यथा—

कर्पूरपूरच्छविशारदरश्मिधारासंकाशकृतिशुभ्रिताभ्रे ।
इन्दोर्नृपद्वेषितमोविनाश 'सूर्योदये रोदिति चक्रवाकी' ॥

सूर्य' धावनृपसम्बोधनम् ॥

श्रीहट्टकेश्वरअगस्त्यमल्यमहास्त-
　पाथोधिमन्थमयपर्वतबिम्बभावैः ।
सङ्ग्रामचक्रिपुरचन्दनशास्त्रपाते-
　स्वराहीशसद्मगुरुताऽऽपि स्थीयमानैः ॥ २९० ॥

एकैकभुवनेऽन्यभुवनानामवतारः । पूर्वं पाताले श्रीहट्टकेश्वरस्वामिनमस्कारेण स्वर्लोकावतारः । अगस्त्यध्येन मर्त्यलोकावतारः । महास्तेन नभोलोकावतारः । यथा—

श्रीहट्टकेश्वरस्वामिनमस्करणकारणात् ।
सुरेन्द्रादिभिरायातैः 'स्वर्गः पातालमाययौ' ॥
कदाचिद्विन्ध्यभेदेन क्रमादन्तमुपागतैः ।
ग्रहैः सम्भाव्यते नूनं 'पातालं प्रययौ नभः' ॥

अथ पृथिव्यां पाथोधिमन्थनसमये स्वर्गपातालयोरवतरणं प्रतिबिम्बभावेन नभोलोकावतरणं विधेयम् । यथा—

समुद्रमथनारम्भे मिलितैरमरादिभिः ।
पृथिव्यां स्वर्गपातालं दृश्येते स्फुटमागते ॥
दर्पणप्रतिमोल्लासिजलपूरस्तेऽम्बरे ।
प्रतिबिम्बच्छलादेतद् 'भुवि व्योम समागतम्' ॥

अथ नभसि संग्रामेण स्वर्गस्य, हरिश्चन्द्रचक्रिपुरेण मर्त्यलोकस्य, चन्दनशास्त्रपाते-रहिलोकस्यावतरणं विधेयम् । यथा—

रणप्रवणवीराणां विलोकनकुतूहलात् ।
समायातैः सुरेन्द्राद्यैः 'स्वर्गो नभसि दृश्यते' ॥
आकाशाध्वसंचारिहरिश्चन्द्रपुरीच्छलात् ।
भौमस्य मिलनादेव 'जगाम जगती नभः' ॥
श्रीरामरावणरणे कपिमण्डलेन बाह्वाकृष्टैर्मलयचन्दनचक्रवालैः ।
रिङ्गद्भुजङ्गमकुलैः पतितैः स्फुरद्भिः 'सम्भाव्यते नभसि सर्पपुरं प्रवर्तत्' ॥

अथ स्वर्गे चण्डीकाभरणरूपेण भुजङ्गमलोकस्य, सप्तगुरुताभिर्मर्त्यलोकस्यावतरणं विधेयम् । नभोलोकस्तत्रैवास्ते । यथा—

श्रीकण्ठकण्ठपीठस्थमहाहिमण्डलैः ।
अयं भुजगलोकोऽपि स्वर्लोककलिताश्रयः ॥

अभ्रंलिहगृहव्यूहचन्द्रशालाविलासिभिः ।
नरनारीगणैर्मन्ये मर्त्यलोको द्युलोकगः ॥

उपमानैः समस्या पूर्यते । उपमानानि सदृशवस्तूनि । यथा—

जन्म स्नात्रे जिनेशस्य मेरौ देवाङ्गनामुखैः ।
परितः स्फुरितैः शङ्के 'शतचन्द्रं नभस्तलम्' ॥

इत्यादि । तद्गुणाधिक्येनेति चतुःश्लोकोपरि शेषपदम् । पदार्थस्य गुणाद
णपदार्थेन समस्या पूर्यते । यथा—

त्रैलोक्ये स्फुरतः शुद्धयशसः पुरतस्तव ।
सोऽपि विडम्बनाय ! 'सोमः श्यामगुणौ' ॥

तद्गुणाधिक्यं यथा ॥

त्वद्गाम्भीर्यगुणस्याग्रे समुद्रो गोष्पदायते ।
त्वद्धामसमरोद्दामस्वर्गगणं भ्रमरायते ॥

एवमौचित्येन तद्गुणाधिक्यमारोप्यम् ॥

श्रीमद्वायडगच्छवारिधिविधोः पादारविन्दद्वये
येन श्रीजिनदत्तसूरिसुगुरोः शृङ्गारभृङ्गायितम् ।
स श्वेताम्बरमौलिरत्नममरः श्रीवीरतीर्थङ्कर-
प्रज्ञात्माऽकृत काव्यकल्पलतिकावृत्तिं सतां संमताम् ॥

विश्लेषमुद्धृतैः शास्त्राब्धेरस्य सारसुधारसैः ।
काव्यकल्पलताऽऽकल्पं तनोतु सुमनोमुदम् ॥

काव्यमेव परब्रह्मास्वादमादरशंसदम् ।
आलोक्य पालयामास कविता[illegible] ॥

वाल्मीकिव्यासयोर्विश्वे विश्वदिङ्मुक्तकूलगा ।
कल्पान्त[illegible] कीर्तिः काव्यादेव विजृम्भते ॥

इति श्रीजिनदत्तसूरिशिष्यमहाकविश्रीमदमरचन्द्रविरचितायां काव्यक
कविशिक्षावृत्तौ अर्थसिद्धिप्रताने चतुर्थं समस्यास्तबकः समाप्तः ॥

## सम्पूर्णश्चायं चतुर्थोऽर्थसिद्धिप्रतानो ग्रन्थश्च ।

वन्दामहे मुदा दैवगणकोदण्डनन्दनम् ।
ज्ञानदीपवदानन्दनन्दनं रघुनन्दनम् ॥

॥ श्रीः ॥

# काव्यकल्पलतावृत्तेः

## कारिकाणामनुक्रमणिका ।

# कारिकाणामनुक्रमणिका ।

... ३४

---


सर्वविधपुस्तकप्राप्तिस्थानम्

जयकृष्णदास-हरिदास गुप्तः—

चौखम्बा संस्कृत सीरिज़ आफिस

विद्याविलास प्रेस, गोपालमन्दिर के उत्तर फाटक,

बनारस सिटी ।

॥ श्री. ॥

## काव्यकल्पलतावृत्तौ वृत्तिकृदुदाहृतानां पद्यानां पद्यांशानां

# सूचीपत्रम् ।

## उदाहरणपद्यसूची ।

# शुद्धिपत्रम् ।

| अशुद्धाः | शुद्धाः | पृ० | पं० | अशुद्धाः | शुद्धाः | पृ० | पं० |
|---|---|---|---|---|---|---|---|
| पेधे | पेधै | १ | ६ | दन्तुर | दन्तुर | ४० | ३३ |
| मूपाल | मूपाल | ३ | ११ | हाम्प | हार्म्प | ४८ | ११ |
| भंद्- | भंद्रि- | ३ | १० | मूमिव | मूमि. | ४८ | ३१ |
| चहोऽर्थ | चहोऽथ | ६ | ८ | भामो | भोमो | ४९ | ३९ |
| वन्धे म | वन्धेम | १० | १ | वर्णान्तक | वर्णान्तक | ५३ | १४ |
| गलाभ्यां | गलाभ्यां | ११ | ६ | सुरस द्रु | सुर सद्रु | ५३ | ८ |
| समसरैः | समासारैः | ११ | ३३ | धंव | धंवं | ५७ | ३० |
| द्रुवा | द्रुवा | १२ | १४ | स्तु | स्तु | ५३ | ३ |
| सुमनमो | सुमनमो | १३ | १ | मुशामि | मूशोमि | ५४ | ३० |
| पाचारैलो | भाचारैलो | १३ | ३० | वद्र | वद्र | ५४ | ३१ |
| वणा | वणा | १८ | ३१ | भावाशि | भावाशि | ५६ | ३० |
| हतोषा | हतोषा | ३१ | ३१ | भवाग्नि | भवाग्निम | ५६ | ३३ |
| प्रारवणो | प्रावरणो | ३३ | १४ | [illegible] | [illegible] | ५० | ४ |
| [illegible] | [illegible] | ३३ | ३८ | [illegible] | [illegible] | ६० | ३६ |
| केशार | केशार | ३३ | १४ | [illegible] | [illegible] | ६० | [illegible] |
| [illegible] | [illegible] | ३३ | ३६ | हरीः | हरीः | ६० | [illegible] |
| [illegible] | [illegible] | ३६ | ३ | [illegible] | [illegible] | ६० | [illegible] |
| [illegible] | [illegible] | ३० | ३ | [illegible] | [illegible] | ६८ | [illegible] |
| पिनाक | पिनाक | ३० | ३३ | [illegible] | [illegible] | ७३ | [illegible] |
| पिनाक | पिनाक. | ३० | ३० | [illegible] | [illegible] | [illegible] | [illegible] |
| [illegible] | [illegible] | ३१ | ६ | [illegible] | [illegible] | [illegible] | [illegible] |
| [illegible] | [illegible] | ३१ | ११ | [illegible] | [illegible] | [illegible] | [illegible] |
| [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] |
| [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] |
| [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] |
| [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] |
| [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] |
| [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] |
| [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] |
| [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] |
| [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] |
| [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] |
| [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] |
| [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] |
| [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] |
| [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] |
| [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] |
| [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] |
| [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] |
| [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] | [illegible] |